44. In his preface to the Vidnyanshataka, Krishna Shastri Ghule assigns the first half of the 7th century A. D. as the time for Bhartrihari on the assumption that he was the brother of Vikramaditya who defeated the Mlechchhas at Korur. In support of this, the Shastri brings forward the writings of the Chinese traveller I-tsing. Since we do not accept Vidnyanashataka as the work of our Bhartrihari, we do not enter into a discussion of the date assigned by Ghule Shastri to the author of the Vidnyanashataka. The conqueror of the Mlechchhas at the battle of Korur was Harsha Vikrama and was a different personage from the founder of the Samvat era.* He was not the brother of Bhartrihari our poet. The Bhartihari, who is mentioned by I-tsing the Chinese traveller as having died in A. D. 630, was in all probability the great grammarian and author of the Vakyapadiya as has been shown above.

45. Ghule Shastri discovers a similarity both as regards phraseology and thought in the writings of Shankaracharya and in those of the Shatakas. This view holds good to a pretty great extent with regard to the Vidnyanashataka. It must, however, here be mentioned that the difference between the संसारविच्छित्ति and स्वर्ग, कर्मनिर्मूलन, त्रिभुवनमपि ब्रह्ममनुते and such other general Vedantic ideas, which are met with in the three Shatakas, existed long before Shankaracharya as will be seen by a reference to the Upanishadas, Vedanta-sutra and the Bhagwatgita. This, therefore, is enough to show the hollowness of the argument that the author of the three Shatakas flourished after Shankaracharya.

46. There is a reference to the Puranas in Stanza 81 of the Vairagyashataka. European Scholars with Prof. Wilson at their head, deny any great antiquity to the Puranas and Samhitas. They do not concede to them an antiquity beyond 1000 years, but that is all more or less on conjecture. What makes up the original Puran, how much of it is interpolation, and how it has been introduced, are

---

* *See* §.33 *supra.*

points which, it is next to impossible, to decide. But there are numerous ground to establish their antiquity far beyond 1000 years.

(*a*) Prof. Wilson, who has upheld the Puranas to have come into existence after Shankaracharya, has probably not noticed a reference to them in Shankaracharya's commentary on the Shwetashwatara Upanishad. Assuming the eighth century as the time when Shankaracharya flourished,* this very reference in the commentary is by itself a sufficiently strong argument to dispel the notion of the Puranas not being older than 1000 years.

(*b*) There is a consesus of opinion that Bána flourished about the sixth or seventh century. The Puranas in general are mentioned in his Kadambari and there is a specific allusion to the Vayupurana in it.

(*c*) There is mention of the Puranas in the Upanishadas and Yádnavalkya Smriti. But we do not think that these Puranas, and those now current, are identical. The Puranas alluded to in the Upanishadas and Yádnyávalkya Smriti must have been some old works not now forthcoming. Prof. Wilson himself accepts this view. Hence the mere mention of Puranapathana by Bhartrihari is not enough to fix his date, for we are not in a position to say with confidence, which of the two Puranas he had in his mind when he wrote the 81st Stanza of the Vairagya Shataka.

(*d*) It is a general belief that Vyása was the author of the 18 Puranas and expressions such as अष्टादशपुराणेषु व्यासस्य वचनद्वयम् and others are current in the language. Vyása systematized and arranged the Vedas. Thus on the one hand, he put into order the Vedas and on the other, composed the Puranas. He might, therefore, be safely looked upon as the connecting link between the Vedic and the Pauranic periods. Astronomical calculations have shown that the Pandavas flourished 5000 years ago. This can be verified from the Yudhisthira era mentioned above. It is well-known that the Pandavas disappeared from this world at the commencement of the Kaliyuga. In the Hindu Calendar for Shaka 1821, we find a mention made of 5000 years of the Kaliyuga having gone by. This then is by itself enough to establish the disappearance of the Pandavas 5000 years

* Mr. Telang, Dr. Bhandarkar and others have assigned the sixth or at the most, seventh century to Shankaracharya, (*vide* Telang's preface to the Mudra-Ra.). An examination of the papers in the records of the Shringeri Matha show hat Shankaracharya the founder, flourished long before the sixth century.

ago. Vyása was their grandfather and if he composed the Puranas, we can easily compute their antiquity. In this connection we give a short extract from No. 2 Vol. 9 of Balabodha. "The Hindus look upon the Vedas—their sacred book—as coeval with the breath of the Divinity. But Vyása arranged the Vedas, hence he is called Veda-vyása. He might, therefore, be looked upon as the founder of the Hindu religion. Vyása's mother was Satyavati the daughter of a fisherman. His father was Paráshara Rishi the son of Shakti who himself was the son of Vasistha. Thus Vyása was the great-grandson of Vasistha. King Dharma and the five Pandavas were the grandson of Vyása. These left the world in the begining of Kali-yuga which is now 5000 years old; hence Vyása, the founder of the Hindu religion, must have existed long before 5000 years and the Vedas, many centuries before this."

47. Thus taking all the *pros* and *cons* into consideration and weighing all circumstantial and coroborative testimony, we see no reason to accept any other but B. C. 56|57 as the date of our author.

(XIV) BHARTRIHARI AND HIS FAMILY.

48. A connected account of the ancestors of Bhartrihari is not available. The Arwachina Kosha mentions 'Virasena' as the name of his father who is said to be a Gandharwa. In one or two Marathi works Gandharwasena* is mentioned as the father of our poet and Vikramaditya as his brother. This Gandharwasena had four wives. They bore him six sons of whom Bhartrihari was the eldest and Vikramaditya was the youngest. The names of the other children are not mentioned. In the Arwachina Kosha it is said that four children were born *viz.* Bhartrihari, Vikramaditya, Subhata-virya and Mainávati. The last was the mother of the celebrated Gopichanda.

49. Bhartrihari's mother was Sushila the only daughter of the King of Jambudwipa. This king had no other issue and hence entrusted the reins of his kingdom to the eldest son of his daughter—Bhartrihari, who transferred the seat of government to Ujjaini, handed over the kingdom to Vikramaditya and nominated Subhata-virya to the office of commander-in-chief.†

* The following account appears in Govind Khanderao Chitnis' Bakhar:—Vikrama was born of a Rajput woman at Cambay from a Gandharva. He went to Ujjaini and acquired a kingdom from Kshipraka of Delhi.

† *See* Nath-Lilamrita *Chap.* XIV.

50. The name of Bhartrihari's wife was Padmákshi and she was the daughter of Sinhasena, King of Magadha. She came to be called Pingalà later on. * We have already mentioned that her name appears as Anangasena in one *Ms.* Hariharopadhyaya gives her name as Bhánumati. Bohlen says Bhartrihari had 300 wives!

51. Mr. Sheshagiri Shastri gives a very curious account. He says "King Vikramaditya is said to have been the son of a Brahman named Chandragupta who married four wives, one of the Brahman caste, another of the Kshatriya, the third of the Vaishya and the fourth of the Shudra caste. They were called Brahmani, Bhanumati, Bhagyawati, and Sindhumati. Each of the four bore him a son. Vararuchi was born of the first wife, Vikramárk of the second, Bhatti of the third and Bhartrihari of the fourth. Vikramark became king while Bhatti served him in the capacity of Prime Minister."

(XV) The Shatakas, their philosophy and religion.

52. The Shatakas were composed when Bhartrihari had renounced the world. It is not easy to say in what order they were written, but from the subject matter of each of them, it is likely that the Shringarashatak was written first, then followed the Niti and lastly the Vairagyashataka. The Nibandhamalakára has remarked that the sentiments and ideas pictured in the Shringar Shataka are such as suit the adolescence of youth, those in the Niti Shataka are appropriate to middle age, while those in the Vairagya Shataka appear most suited to ripe old age. The first gives expression to feelings and sentiments which arise in the mind when there is buoyancy of spirit, freshness of vigour and vivacity of youth; the second manifests thoughts arising from a deeper insight into the world and its trammels; and the third is the outcome of a mind tired and digusted with the turmoils of mundane material matters seeking repose in renunciation, calm contentment and quietitude and religious meditation. †

53. We shall endeavour to give a fuller account:—

The Shringar Shataka which deals with erotic sentiment describes beautiful women, their nature and deportment and their

* *See* § 15 *supra.*

† Nibandhamala. No. 28.

effect on the mind of man. Along with this there is a description of the different seasons. The poet "shows himself" says Prof. Macdonnell, "to be well-acquainted both with the charms of women and with the arts by which they captivate the hearts of men." He graphically pictures the effects of all this on the strongest of minds and how they fall victims to the shafts of Love. He, however, does not forget to despise harlots and to censure the weakness of man, exhaulting him who stands proof against the wiles and amorous attractions of woman. Towards the end of the Shataka the poet declares himself to be 'an altered man;' youth has gone by, and my thoughts are bent on the forest; my infatuation is over, and I now view the whole world as no more than a blade of grass. This may be said to show the tendency of our poet's views in his days of youthful ardour, and the gradual change it was undergoing.

The second or Niti-Shataka, is an endeavour to show the difficulty of the task of bringing fools to their senses, and the various, methods resorted to by the greedy to acquire wealth, is rich in high sentiments about conduct in this world, such as the nobleness in adhering to a promise, the value of learning, self-respect, valour, moral courage, and large-mindedness. In addititin to this, it inculcates principles which will be met with in almost every religion, the importance of industry, the traits of a true friend and a contrast of the conduct of a virtuous and noble hearted man with that of a selfish and little-minded individual. These and other various subjects are so pointedly treated in an epigrammatic form and are of such general applicability that the stanzas will continue to hold a high rank in the literature selected for the inculcation of principles and rules for the conduct of youth in this world.

The third and the last *viz.* Vairagyashataka, as its very name indicates, abounds in aphorisms holding out the greedy to ridicule, and the arrogance of the rich to contempt. It has pointed out in vigorous language the high pressure of physical wants under which the strongest of minds are apt to break down but exhorts the reader to a devotion to the Supreme Providence who is the only controller of all the universe, and exults in directing man to a renunciation of all wordly matters and seek final beatitude in the Great Almighty through His various manifestations.

√54. Some critics have hinted that Bhartrihari was Buddhistic in his teachings, but we see no grounds to go with them. If there

are aphorisms inculcating the principles of kindness to all living creatures and the like, they are such as can be found in any other religion. Although there was religious feud and controversy between Brahamanism and Buddhism, and although the Brahmans showed extreme intolerance at one time, still even their declared work—the Mahabharata—contains broad and liberal sentiments: *e. g.*

" Men of high rank win no esteem
If lacking in good qualities;
A Shudra even deserves respect,
Who knows and does his duty well."

We have no hesitation to say that the principles laid down by our poet are of such universal a nature that they will suit all faiths and all times, if rightly interpreted. If any particular faith is at all to be ascribed to Bhartrihari, we would set him down as an Adwaitwádi from the numerous specific references which he makes to Vedantic theories in his poems. His expressions with regard to the devotion to that manifestation of the Almighty in its material form as Shiwa* and his strictures on womankind in general, show him to be an austere ascetic who had very little regard for the material world. In a word, Bhartrihari's Vairagyashataka is full of devotion, knowledge and contentment which is its peculiar characteristic. The vividity and accuracy of the scenic descriptions given by him cannot be realised by those who are the slaves of the world and who are panting after its fleeting and ephemeral gains; but they can be appreciated by those who have turned aside their minds from all such matters and have devoted themselves to the contemplation of that benign Providence who is the haven of all—the rich as well as the poor, the happy as well as the distressed. For instance, those who have undertaken and accomplished the circuit of the river Narmadá, have amply borne out our poet with regard to his rich descriptions of moonlights on the sides of the river and the high moral pitch to which the mind is carried in those scenes, on calm and quiet nights such as are delineated by our poet.

(XVI) THE POSITION OF THE SHATAKAS FROM A LITERARY POINT.


55. Although the style of composition of the Shatakas can not


* See Buckle's History of Civilization.

be said to come up to that of Jayadeva or Jagannath Pandita, still it is fluent, harmonious, and rich in words full of meaning. It is neither artificial nor laboured. It is so chaste, so simple and so flowing that the meaning and thought of the author is grasped by the most ordinary reader, even if he does not possess an accurate knowledge of the Sanskrit language in its manifold complexities. Enough has already been said of the accuracy of description of physical phenomena and of their effects delineated by our poet. The propositions and general principles enunciated by Bhartrihari have been so lucidly put forward and so well substantiated by instances from every-day life, that they readily catch the heart of the reader. His verses possess these characteristics to such a degree, that they are quoted freely in conversation and didactic discourses, which in itself is no small proof of the richness and superiority of the compositions of Bhartrihari. We must not forget that there are some grammatical inaccuracies and involved constructions in Bhartrihari's poems, but both are so few and small that they do not block the progress of the reader either in grasping the meaning or in appreciating the beauty of thought.

The metres adopted in the Shatakas are small, vigourous and varied, which serve not only to break the monotony but to lend a charm to the composition. Moreover, the verses abound in figures of speech which are so natural and easy that they neither demand any extraordinary labour nor great learning from the reader. The more these stanzas are read, the more agreeable they become. The mind is never satiated; new beauties are discovered every time a Stanza is read and either a new train of thought is set in motion or the same more firmly impressed. The charm of the poem is heightened with each reading. क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः *Magha* IV. 17. can be aptly said with regard to Bhartrihari.







॥ श्रीगणेशाय नमः ॥

॥ अथ नीतिशतकम् ॥

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ॥
स्वानुभूत्येकमानाय* नमः शान्ताय तेजसे ॥ १ ॥

यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ॥
अस्मत्कृते च परिशुष्यति* काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च ॥ २ ॥

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ॥
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं* न रञ्जयति ॥ ३ ॥

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्राङ्कुरा-*
त्समुद्रमपि संतरेत्प्रचलदूर्मिमालाकुलम् ॥
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ४ ॥

लभेत सिकतासु तैलमपि यत्नतः पीडय-
न्पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ॥
कदाचिदपि पर्यटञ्शशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ५ ॥

---

* A star in the text indicates the position of a variation in the reading.

1. स्वानुभूत्येकसाराय; 2. परितुष्यति; 3. ब्रह्मापि तं नरं; 4. दंष्ट्रान्तरात्.

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
*छेत्तुं वज्रमणीञ्छिरीषकुसुमप्रान्तेन संनह्यते ॥
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते ॥
नेतुं वाञ्छति यः खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः॥६॥

स्वायत्तमेकान्तगुणं विधात्रा
विनिर्मितं छादनमज्ञतायाः ॥
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ॥ ७ ॥

यदा किंचिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ॥
यदा किंचित्किंचिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ ८ ॥

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसं *प्रीत्या खादन्नरास्थि निरामिषम् ॥
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥ ९ ॥

शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं*
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ॥
अधोधो गङ्गेयं* पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ १० ॥

शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ॥
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥११॥

साहित्यसङ्गीतकलाविहीनः
साक्षात्पशुः पुच्छविषाणहीनः ॥

6. भेत्तुं; 9. निरुपमरसप्रीत्या; 10. स्वर्गात्पतति शिरसस्तत्, स्वर्गात् पतति शिरसोतः; 10. अधो गङ्गा सेयम्.

तृणं न खादन्नपि जीवमान-
स्तद्भागधेयं परमं पशूनाम् ॥ १२ ॥

येषां न विद्या न तपो न दानं
*ज्ञानं न शीलं न गुणो न धर्मः ॥
ते मर्त्यलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति ॥ १३ ॥

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह
न मूर्खजनसंपर्कः सुरेन्द्रभवनेष्वपि ॥ १४ ॥

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ॥
तज्जाड्यं वसुधाधिपस्य कवयो ह्यर्थं विनापीश्वराः
कुत्स्याः स्युः कुपरीक्षका न मणयो यैरर्घतः पातिताः ॥१५॥

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा
*ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ॥
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान्प्रतिमानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥ १६ ॥

अधिगतपरमार्थान्पण्डितान्मावमंस्था-
स्तृणमिव लघुलक्ष्मीर्नैव तान्संरुणद्धि ॥
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति बिसतन्तुर्वारणं वारणानाम् ॥ १७ ॥

अम्भोजिनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ॥
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ १८ ॥

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः ॥

13. न चापि शीलं; 16. प्यर्थिभ्यः

वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥ १९ ॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ॥
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं*
विद्या राजसुपूजिता *न तु* धनं विद्याविहीनः पशुः ॥२०॥

क्षान्तिश्चेत्कवचेन * किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम् ॥
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्यानवद्या यदि
व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ॥२१॥

दाक्षिण्यं स्वजने दया परजने *शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवम्* ॥
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥ २२ ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ॥
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम् ॥ २३ ॥

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ॥
नास्ति येषां यशःकाये जरामरणजं भयम् ॥ २४ ॥

सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः
स्निग्धं मित्रमवञ्चकः परिजनो निष्क्लेशलेशं मनः ॥
आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं
तुष्टे विष्टपकष्टहारिणि* हरौ संप्राप्यते देहिना ॥ २५ ॥

---

20. परा देवता; राजसु पूजिता, पूज्यते; न हि; 21. चेद्वचनेन; 22. परिजने; प्यार्जवम्; 25. विष्टपहारिणीष्टद.

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ॥
तृष्णास्रोतोविभंगो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः* श्रेयसामेष पन्थाः॥२६॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ॥
विघ्नैः पुनःपुनरपि प्रतिहन्यमानाः
* प्रारब्धमुत्तमजना न परित्यजन्ति ॥ २७ ॥

* असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः
प्रिया न्याय्या वृत्तिर्मलिनमसुभंगेष्यसुकरम् ॥
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ २८ ॥

क्षुत्क्षामोपि जराकृशोपि *शिथिलप्रायोऽपि कष्टां दशा
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ॥
* मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ २९ ॥

* स्वल्पस्नायुवसावशेषमलिनं * निर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशान्तये ॥
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥३०॥

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ॥

26. अनुपहतगतिः; 27. प्रारभ्य चो; 28. In Mr. Telang's Edition the first line of this stanza is second with त्वसन्तो instead of असन्तो and the second is first. 29. शिथिलप्राणोऽपि; कुम्भपिशित; 30. स्वल्पम्; प्यस्थि गोः;

श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ ३१ ॥

परिवर्तिनि संसारे मृतः को वा न जायते ॥
स जातो येन जातेन याति वंशः समुन्नतिम् ॥ ३२ ॥

कुसुमस्तबकस्येव * द्वयी वृत्तिर्मनस्विनः ॥
मूर्ध्नि वा सर्वलोकस्य * शीर्यते वन एव वा ॥ ३३ ॥

सन्त्यन्येपि बृहस्पतिप्रभृतयः संभाविताः पञ्चषा-
स्तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते
द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ * भास्वरौ
* भ्रातः पर्वणि पश्य दानवपतिः * शीर्षावशेषीकृतः ॥३४॥

वहति भुवनश्रेणीं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स विधार्यते ॥
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-
दहह महतां निःसीमानश्चरित्रविभूतयः ॥ ३५ ॥

वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहलदहनोद्गारगुरुभिः ॥
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे
न चासौ संपातः पयसि पयसां पत्युरुचितः ॥ ३६ ॥

यदचेतनोपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ॥
तत्तेजस्वी पुरुषः * परकृतनिकृतिं कथं सहते ॥ ३७ ॥

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ॥
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥ ३८ ॥

जातिर्यातु रसातलं गुणगणस्तस्याप्यधो * गच्छतु
शीलं शैलतटात्पततत्वभिजनः संदह्यतां वन्हिना ॥

---

33. द्वे गती स्तो मनस्विनाम्; 34. विशीर्येत वनेऽथवा; भासुरौ; भ्रान्तः; शीर्षावशेषाकृतिः; 37. परकृतविकृतिं; 39. गच्छतात्, गच्छताम्;

शौर्यं वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥ ३९ ॥

तानीन्द्रियाणि सकलानि तदेव कर्म
सा बुद्धिरप्रतिहता वचनं तदेव ॥
अर्थोष्मणा विरहितः पुरुषः स एव
त्वन्यः क्षणेन भवतीति विचित्रमेतत् ॥ ४० ॥

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान्गुणज्ञः ॥
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ते ॥ ४१ ॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालना-
द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ॥
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया-
न्मैत्री * चाप्रणयात्समृद्धिरनयात्त्यागप्रमादाद्धनम् ॥ ४२ ॥

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ॥
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ ४३ ॥

मणिः शाणोल्लीढः समरविजयी * हेतिनिहतो
मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः ॥
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु * जनाः ॥ ४४ ॥

परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये
स पश्चात्संपूर्णः कलयति धरित्रीं तृणसमाम् ॥
* अतश्चानैकान्त्याद्गुरुलघुतयार्थेषु धनिना-
मवस्था वस्तूनि प्रथयति च संकोचयति च ॥४५ ॥

---

42. त्यागात्प्र; 44. हेतिदलितो; नृपाः; 45. नेकान्ता, नैकान्त्या;

राजन्दुधुक्षसि यदि क्षितिधेनुमेतां
तेनाद्य वत्समिव लोकममुं पुषाण ॥
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः ॥ ४६ ॥

सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ॥
नित्यव्यया प्रचुरनित्यधनागमा च
वेश्याङ्गनेव नृपनीतिरनेकरूपा ॥ ४७ ॥

आज्ञा कीर्तिः पालनं * ब्राह्मणानां
दानं भोगो मित्रसंरक्षणं च ॥
येषामेते षड्गुणा न प्रवृत्ताः
कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ ४८ ॥

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् ॥
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥ ४९ ॥

त्वमेव * चातकाधार इति केषां न गोचरः ॥
किमम्भोदवरास्माकं * कार्पण्योक्तिं प्रतीक्षसे ॥ ५० ॥

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयता-
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ॥
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥ ५१ ॥

अकरुणत्वमकारणविग्रहः
परधने परयोषिति च स्पृहा ॥

48. सज्जनानाम्; 50. चातकाधारोऽसीति; कार्पण्योक्तिः प्रतीक्ष्यते.

सुजनबन्धुजनेष्वसहिष्णुता
प्रकृतिसिद्धमिदं हि दुरात्मनाम् ॥ ५२ ॥

दुर्जनः परिहर्तव्यो विद्यया * भूषितोऽपि सन् ॥
* मणिनाऽलंकृतः सर्पः किमसौ न भयंकरः ॥ ५३ ॥

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणता * मुनौ विमतिता दैन्यं प्रियालापिनि ॥
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत्को नाम गुणो * भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः ॥५४॥

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम् ॥
सौजन्यं यदि किं * निजैः स्वमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं * धनैरपयशो यद्यस्ति किं मृत्युना ॥५५॥

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ॥
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
* नृपांगनगतः खलो मनसि सप्त शल्यानि मे ॥ ५६ ॥

न कंश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ॥
* होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥ ५७ ॥

मौनान्मूकः प्रवचनपटुश्चाटुलो जल्पको वा
धृष्टः पार्श्वे वसति च तदा दूरतश्चाप्रगल्भः ॥
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ५८ ॥

उद्भासिताखिलखलस्य विशृङ्खलस्य
* प्राग्जातविस्तृतनिजाधमकर्मवृत्तेः ॥

53. ऽलंकृतोऽपि; मणिना भूषिताः; 54. ऋजो; भवेत्सुगुणिनाम् ; 55. गुणैः; जनैः; 56. नृपाङ्गणगतः; 57. होतारं जुव्हतमपि; 59. प्राग्जातविस्मृत.

दैवादवाप्तविभवस्य गुणद्विषोऽस्य
नीचस्य गोचरगतैः * सुखमाध्यते कैः ॥ ५९ ॥

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ॥
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥ ६० ॥

मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनाम् ॥
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ ६१ ॥

वाञ्छा सज्जनसंगमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ॥
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
* येष्वेते निवसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥ ६२ ॥

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ॥
यशसि * चाभिरतिर्व्यसनं * श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ ६३ ॥

प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं * चाप्युपकृतेः ॥
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ६४ ॥

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयिभुजयोर्वीर्यमतुलम् ॥
हृदि * स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयो-
र्विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ६५ ॥

---

59. सुखमास्यते; 62. ष्वेते येषु वसन्ति; 63. चाभिरुचि; श्रुते. 64. नाप्युपकृते ; 65. स्वस्था.

संपत्सु महतां चित्तं भवत्युत्पलकोमलम् ॥
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥ ६६ ॥

संतप्तायसि संस्थितस्य पयसो नामापि न * श्रूयते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ॥
स्वात्यां सागरशुक्तिमध्यपतितं * सन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणः * संसर्गतो जायते ॥ ६७ ॥

* प्रीणाति यः सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ॥
तन्मित्रमापदि सुखे च समक्रियं य-
देतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ ६८ ॥

नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान्गुणान्ख्यापयन्तः
स्वार्थान्संपादयन्तो विततपृथुतरारम्भयत्नाः परार्थे ॥
क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान्दुर्मुखान्दूषयन्तः
सन्तः साश्चर्यचर्या जगति बहुमताः कस्यनाभ्यर्चनीयाः॥६९॥

भवन्ति नम्रास्तरवः फलोद्गमै-
* र्नवाम्बुभिर्भूमिविलम्बिनो घनाः ॥
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥ ७० ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन ॥
विभाति कायः करुणापराणां
परोपकारैर्न तु चन्दनेन ॥ ७१ ॥

पापान्निवारयति योजयते हिताय
गुह्यं च गूहति गुणान्प्रकटीकरोति ॥

67. ज्ञायते; तन्मौक्तिकं; संवासतो; 68. यः प्रीणयेत्; 70. नवाम्बुभिर्भूरि·

आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ७२ ॥

पद्माकरं दिनकरो विकचीकरोति
चन्द्रो * विकासयति कैरवचक्रवालम् ॥
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः ॥ ७३ ॥

*एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ॥
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
* ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ७४ ॥

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा * स्वात्मा कृशानौ हुतः ॥
गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥ ७५ ॥

इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-
मितश्च * शरणार्थिनः शिखरिणां गणाः शेरते ॥
इतोऽपि वडवानलः सह समस्तसंवर्तकै-
रहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ ७६ ॥

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम् ॥
मान्यान्मानय विद्विषोऽप्यनुनय प्रच्छादय स्वान्गुणा-
न्कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां * चेष्टितम् ॥ ७७ ॥

मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभिः * प्रीणयन्तः ॥

73. विकाशयति. 74. एके; ये निघ्नन्ति. 75. ह्यात्मा. 76. शरणार्थिनाम्. 77. लक्षणम्. 78. पूरयन्तः.

परगुणपरमाणून्पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ ७८ ॥

किं तेन हेमगिरिणा रजताद्रिणा वा
यत्राश्रिताश्च तरवस्तरवस्त एव ॥
मन्यामहे मलयमेव यदाश्रयेण
कङ्कोलनिम्बकुटजा * अपि * चन्दनाः स्युः ॥ ७९ ॥

रत्नैर्महार्हैस्तुतुषुर्न देवा
न भेजिरे भीमविषेण भीतिम् ॥
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद्विरमन्ति धीराः ॥ ८० ॥

क्वचिद्भूमौ * शायी क्वचिदपि च * पर्यङ्कशयनः
क्वचिच्छाकाहारी क्वचिदपि च शाल्योदनरुचिः ॥
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी * गणयति न दुःखं न च सुखम् ॥ ८१ ॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ॥
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ ८२ ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ॥
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ८३ ॥

भग्नाशस्य * करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ॥

79. कुटजान्यपि; चन्दनानि. 81. शय्या; शयनम्; न गणयति.
84. करण्डपिण्डित.

तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
लोकाः पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥ ८४ ॥

पातितोपि कराघातैरुत्पतत्येव कन्दुकः ॥
प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः ॥ ८५ ॥

आलस्यं हि मनुष्याणां शरीरस्थो * महान्रिपुः ॥
नास्त्युद्यमसमो बन्धुः * कृत्वा यं नावसीदति ॥ ८६ ॥

छिन्नोपि रोहति तरुः क्षीणोप्युपचीयते पुनश्चन्द्रः ॥
इति विमृशन्तः सन्तः संतप्यन्ते * न ते विपदा ॥ ८७ ॥

नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः किल हरेरैरावतो वारणः ॥
* इत्यैश्वर्यबलान्वितोपि बलभिद्भग्नः परैः संगरे
तद्व्यक्तं वरमेव दैवशरणं धिग्धिग्वृथा पौरुषम् ॥ ८८ ॥

कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ॥
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ८९ ॥

खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके
वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः ॥
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥ ९० ॥

* शशिदिवाकरयोर्ग्रहपीडनं
गजभुजंगमयोरपि बन्धनम् ॥
मतिमतां च विलोक्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥ ९१ ॥

86. महारिपुः; कुर्वाणो नावसीदति. 87. न विप्लुता लोके. 88 इत्याश्चर्य.
90. This line changes place with the second.

सृजति तावदशेषगुणाकरं
पुरुषरत्नमलंकरणं भुवः ॥
तदपि तत्क्षणभङ्गिकरोति चे-
दहह कष्टमपण्डितता विधेः ॥ ९२ ॥

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
नोलूकोप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम् ॥
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः ॥ ९३ ॥

नमस्यामो देवान्ननु हतविधेस्तेपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ॥
फलं कर्मायत्तं * किममरगणैः किं च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ ९४ ॥

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे ॥
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ ९५ ॥

नवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ॥
भाग्यानि पूर्वतपसा खलु संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ९६ ॥

वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वा ॥
सुप्तं प्रमत्तं विषमस्थितं वा
रक्षन्ति पुण्यानि पुरा कृतानि ॥ ९७ ॥

या साधूंश्च खलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ॥

94. यदि किममरैः

नामाराध्य सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥९८॥

गुणवदगुणवद्वा कुर्वता * कार्यमादौ
परिणतिरवधार्या यत्नतः पण्डितेन ॥
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ९९ ॥

स्थाल्यां * वैडूर्यमय्यां पचति तिलखलीमिन्धनैश्चन्दनाद्यैः
सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कमूलस्य हेतोः ॥
छित्वा कर्पूरखण्डान्वृतिमिह कुरुते कोद्रवाणां समन्ता-
त्प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः॥१००॥

मज्जत्वम्भसि यातु मेरुशिखरं शत्रूञ्जयत्वाहवे
वाणिज्यं कृषिसेवनादि सकला विद्याः कलाः * शिक्षताम् ॥
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह भाग्यवशतो भाव्यस्य नाशः कुतः ॥१०१॥

भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः सुजनतामुपयाति तस्य ॥
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ १०२ ॥

को लाभो गुणिसंगमः किमसुखं प्राज्ञेतरैः संगतिः
का हानिः समयच्युतिर्निपुणता का धर्मतत्वे रतिः ॥
कः शूरो विजितेन्द्रियः प्रियतमा कानुव्रता किं धनं
विद्या किं सुखमप्रवासगमनं राज्यं किमाज्ञाफलम् ॥ १०३ ॥

मालतीकुसुमस्येव द्वे गतीह मनस्विनः ॥
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥ १०४ ॥

अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ॥
परपरिवादनिवृत्तैः क्वचित्क्वचिन्मण्डिता वसुधा ॥ १०५ ॥

99. कार्यजातम्; 100. वैडूर्यमय्यां; 101. शिक्षतु;

कदर्थितस्यापि हि धैर्यवृत्ते-
　र्न शक्यते धैर्यगुणः प्रमार्ष्टुम् ॥
अधोमुखस्यापि * तनूनपातो
　नाधः शिखा याति कदाचिदेव ॥ १०६ ॥

कान्ताकटाक्षविशिखा न * लुनन्ति यस्य
　चित्तं न निर्दहति कोपकृशानुतापः ॥
कर्षन्ति भूरिविषयाश्च न लोभपाशै-
　र्लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥ १०७ ॥

एकेनापि हि शूरेण पादाक्रान्तं महीतलम् ॥
　क्रियते भास्करेणेव स्फारस्फुरिततेजसा ॥ १०८ ॥

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
　न्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ॥
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
　यस्यांगेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ १०९ ॥

* लज्जागुणौघजननीं जननीमिव स्वा-
　मत्यन्तशुद्धहृदयामनुवर्तमानाम् * ॥
तेजस्विनः सुखमसूनपि संत्यजन्ति
　सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् ॥ ११० ॥

MISCELLANEOUS.

अग्राह्यं हृदयं यथैव वदनं * यद्दर्पणान्तर्गतं
　भावः पर्वतसूक्ष्ममार्गविषमः स्त्रीणां न विज्ञायते ॥
चित्तं पुष्करपत्रतोयतरलं विद्वद्भिराशंसितं
　नारी नाम विषाङ्कुरैरिव लता दोषैः समं वर्धिता ॥ १ ॥

---

106. कृतस्य वन्हेः. 107. खनन्ति; 110. लज्जाम्. अनुवर्तमानाः.
1. सद्दर्पणान्तर्गतम्.

अभिमुखनिहतस्य सतस्तिष्ठतु तावज्जयोऽथवा स्वर्गः ॥
उभयबलसाधुवादः श्रवणसुखोऽसौ बतात्यर्थम् ॥ २ ॥

इयत्येतस्मिन्वा निरवधिचमत्कृत्यतिशये
वराहो वा राहुः प्रभवति चमत्कारविषयः ॥
महीमेको मग्नां यदयमवहद्दन्तसलिलैः
शिरःशेषः शत्रुर्निगिलति परं संत्यजति च ॥ ३ ॥

उदन्वच्छन्ना भूः स च निधिरपां योजनशतं
सदा पान्थः पूषा गगनपरिमाणं कलयति ॥
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥ ४ ॥

एको देवः केशवो वा शिवो वा
एकं मित्रं भूपतिर्वा यतिर्वा ॥
एको वासः पत्तने वा वने वा
एका भार्या सुन्दरी वा दरी वा ॥ ५ ॥

कमठकुलाचलदिग्गजफणिपतिविधृतापि चलति वसुधेयम् ॥
प्रतिपन्नममलमनसां न फ (च ?) लति पुंसां युगान्तेऽपि॥६॥

किं कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष य-
त्किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः ॥
* किंत्वङ्गीकृतमुत्सृजन् * स्वमनसा श्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् ॥ ७ ॥

को न याति वशं लोके मुखे पिण्डेन पूरितः
मृदङ्गो मुखलेपेन करोति मधुरध्वनिम् ॥ ८ ॥

क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोद्यताः
स्वार्थो यस्य परार्थ एव * स पुमानेकः सतामग्रणीः ॥

7. किंचा, किंवा; न मनसा. 9. परमो नैकः

* दुष्पूरोदरपूरणाय पिबति स्रोतः पतिं वाडवो
जीमूतस्तु निदाघसंभृतजगत्संतापविच्छित्तये ॥ ९ ॥

दूरादर्थं घटयति नवं दूरतश्चापशब्दं
त्यक्त्वा भूयो भवति निरतः सत्सभारञ्जनेषु ॥
मन्दं मन्दं रचयति पदं लोकचित्तानुवृत्त्या
कामं मन्त्री कविरिव सदा खेदभारैरमुक्तः ॥ १० ॥

दैवेन प्रभुणा स्वयं जगति यद्यस्य प्रमाणीकृतं
तत्तस्योपनमेन्मनागपि महान्नैवाश्रयः कारणम् ॥
सर्वाशापरिपूरके जलधरे * वर्षत्यपि प्रत्यहं
सूक्ष्मा एव पतन्ति चातकमुखे द्वित्राः पयोबिन्दवः ॥ ११ ॥

परिचरितव्याः सन्तो यद्यपि कथयन्ति न सदुपदेशम् ॥
यास्त्वेषां स्वैरकथास्ता एव भवन्ति शास्त्राणि ॥ १२ ॥

प्रायः * कन्दुकपातेन पतत्यार्यः पतन्नपि ॥
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ॥ १३ ॥

यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातम् ॥
अवकरनिकरं विकिरति तत्किं कृकवाकुरिव हंसः ॥ १४ ॥

यन्नागा * मदवारिभिन्नकरटास्तिष्ठन्ति निद्रालसा
द्वारे हेमविभूषणाश्च तुरगा वल्गन्ति यद्दर्पिताः ॥
वीणावेणुमृदङ्गशङ्खपटहैः सुप्तस्तु यद्बोध्यते
तत्सर्वं सुरलोकदेवसदृशं धर्मस्य विस्फूर्जितम् ॥ १५ ॥

ये * संतोषनिरन्तरप्रमुदितास्तेषां न भिन्ना मुदो
ये त्वन्ये धनलोभसंकुलधियस्तेषां न तृष्णा हता ॥
इत्थं कस्य कृते कृतः स विधिना तादृक्पदं संपदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ १६ ॥

---

9. दुःपूरो. 11. वर्षत्यपः. 13. पातेनोत्पतत्यार्यः. 15. मदभिन्नगण्ड. 16. संतोषसुखप्रमोदमुदिता.

रक्तत्वं कमलानां सत्पुरुषाणां परोपकारित्वम् ॥
असतां च निर्दयत्वं स्वभावसिद्धं त्रिषु त्रितयम् ॥ १७ ॥

वचो हि सत्यं परमं विभूषणं
गजाङ्गनायाः कृशता * कटौ च ॥
द्विजस्य विद्यैव पुनस्तथा क्षमा
शीलं हि सर्वस्य नरस्य भूषणम् ॥ १८ ॥

वरं तुङ्गाच्छृङ्गाद्गुरुशिखरिणः क्वापि * विषमे
पतित्वायं कायः कठिनदृषदन्तर्विदलितः ॥
वरं न्यस्तो हस्तः फणिपतिमुखे तीव्रदशने
वरं वन्हौ पातस्तदपि न कृतः शीलविलयः ॥ १९ ॥

विरम विरसायासादस्माद्दुरध्यवसायतो
विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे ॥
* अयि जडमते कल्पापाये व्यपेतनिजक्रमाः
कुलशिखरिणः क्षुद्रा नैते न वा जलराशयः ॥ २० ॥


स्पृहयति भुजयोरन्तरमायतकरवालकररुहविदीर्णम् ॥
विजयश्रीर्वीराणां व्युत्पन्नप्रौढवनितेव ॥ २१ ॥

अयममृतनिधानं नायकोऽप्योषधीनां
शतभिषगनुयातः शम्भुमूर्ध्नोऽवतंसः ॥
विरहयति न चैनं राजयक्ष्मा शशाङ्कं
हतविधिपरिपाकः केन वा लङ्घनीयः ॥ २२ ॥

शुभ्रं सद्म सविभ्रमा युवतयः श्वेतातपत्रोज्वला
लक्ष्मीरित्यनुभूयते चिरमनुस्यूते शुभे कर्मणि ॥
विच्छिन्ने नितरामनङ्गकलहक्रीडात्रुटत्तन्तुकं
मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दिशोदृश्यताम् ॥ २३ ॥

---

18. कृशतातश्च. 19. पुलिने. 20. अपि.



॥ श्रीगणेशाय नमः ॥

॥ अथ वैराग्यशतकम् ॥

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ॥
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥ १ ॥

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ॥
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥ २ ॥

न संसारोत्पन्नं चरितमनुपश्यामि कुशलं ॥
विपाकः पुण्यानां जनयति भयं मे विमृशतः ॥
महद्भिः * पुण्यौघैश्चिरपरिगृहीता हि विषया
महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥ ३ ॥

उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संतोषिताः ॥
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः
* प्राप्तः काणवराटकोऽपि न मया * तृष्णेऽधुना मुञ्च माम् ॥४॥

* भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं ॥
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ॥
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकव-
त्तृष्णे * जृम्भसि पापकर्मनिरते नाद्यापि संतुष्यसि ॥ ५ ॥

---

* A star in the text indicates the position of a variation in the reading.

3. पुण्यौघैश्चिरपरिगृहीताश्च, पुण्यौघैश्चिरमपि गृहीताश्च. 4. संप्राप्तश्च वराटकोपि; ृष्णे सकामा भव; त्वा;. 5. जृम्भाणि, वैरिणि.

खलालोपाः सोढाः कथमपि तदाराधनपरै-
निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा ॥
कृतश्चित्तस्तम्भः * प्रतिहतधियामञ्जलिरपि
त्वमाशे मोघाशे * किमु परमतो नर्तयसि माम् ॥ ६ ॥

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं
व्यापारैर्बहुकार्यभारगुरुभिः कालो * न विज्ञायते ॥
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ७ ॥

दीना दीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरा
क्रोशद्भिः * क्षुधितैर्नरैर्न विधुरा दृश्येत चेद्गेहिनी ॥
याच्ञाभङ्गभयेन * गद्गदगलत्त्रुट्यद्विलीनाक्षरं
को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी जनः ॥ ८ ॥

निवृत्ता भोगेच्छा पुरुषबहुमानो * विगलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ॥
* शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने
अहो * धृष्टः कायस्तदपि मरणापायचकितः ॥ ९ ॥

हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं
व्यालानां पशवस्तृणाङ्कुरभुजः सृष्टाः स्थलीशायिनः ॥
संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां
यामन्वेषयतां प्रयान्ति * सततं सर्वे समाप्तिं गुणाः ॥ १० ॥

न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये
स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः ॥
* नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥ ११ ॥

6. प्रहसितधिया; किमपर. 7. ऽपि न ज्ञायते. 8 क्षुधितैर्निरन्नविधुरा; गद्गदग-लद्गच्छद्वि. 9. ऽपि; शनैरभ्युत्थानं; •दुष्टः; 10. सहसा; 11 ० युगुलं.

भोगा न भुक्ता वयमेव भुक्ता-
स्तपो न तप्तं वयमेव तप्ताः ॥
कालो न यातो वयमेवयाता-
स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥ १२ ॥

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः
* सोढो दुःसहशीतवाततपन क्लेशो न तप्तं तपः ॥
ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शम्भोः पदं
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः * फलैर्वञ्चिताः ॥ १३ ॥

वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः ॥
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ १४ ॥

येनैवाम्बरखण्डेन संवीतो निशि चन्द्रमाः ॥
तेनैव च दिवा * भानुरहो दौर्गत्यमेतयोः ॥ १५ ॥

अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ॥
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयं त्यक्ता * ह्येते शमसुखमनन्तं विदधति ॥ १६ ॥

विवेकव्याकोशे विकसति * शमे शाम्यति तृषा-
परिष्वङ्गे तुङ्गे प्रसरतितरां सा परिणतिः ॥
जराजीर्णैश्वर्यग्रसनगहनाक्षेपकृपण- *
स्तृषापात्रं यस्यां भवति मरुतामप्यधिपतिः ॥ १७ ॥

कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो
व्रणी * पूयक्लिन्नः कृमिकुलशतैरावृततनुः ॥
क्षुधाक्षामो जीर्णः * पिठरककपालार्पितगलः
शुनीमन्वेति श्वा हतमपि च हन्त्येव मदनः ॥ १८ ॥

---

13. सोढा दुःसहशीतवाततपनाः क्लेशान्न; फलैर्वञ्चितम्; 15. भानुः नश्य; 16. स्त्वेते; 17. शनैः; ०णः कृपापात्रं; 18. पूतिक्लिन्नः; पिठरजकपालार्पित, पेठरककपालार्दित.

भिक्षाशनं तदपि नीरसमेकवारं
 शय्या च भूः परिजनो निजदेहमात्रम् ॥
वस्त्रं * सुजीर्णशतखण्डमयी च कन्था
 हाहा तथापि * विषयान्न जहाति चेतः ॥ १९ ॥

स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ
 मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ॥
स्रवन्मूत्रक्लिन्नं * करिवरशिरस्पर्धि * जघन-
 महो निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ॥ २० ॥

* अजानन्माहात्म्यं पततु * शलभो दीपदहने
 स मीनोऽप्यज्ञानाद्बडिशयुतमश्नातु पिशितम् ॥
विजानन्तोऽप्येते वयमिह विपज्जालजटिला-
 न्न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ २१ ॥

* फलमलमशनाय स्वादु पानाय तोयं
 * शयनमवनिपृष्ठं वल्कले वाससी च ॥
* नवधनमधुपानभ्रान्तसर्वेन्द्रियाणा-
 मविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥ २२ ॥

* विपुलहृदयैर्धन्यैः कैश्चिज्जगज्जनितं पुरा
 विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ॥
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
 कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥ २३ ॥

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः
 ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ॥

---

19. च जीर्णशतखण्डमयी च, च जीर्णशतखण्डमलीन; विषया न परित्यजन्ति; 20. ०करस्पर्धि; जघनं परं; 21. अजानन्दाहात्म्यं, अजानन्दाहार्तिं; शलभस्तीव्र; 22. बिस; ०मवनिपृष्ठे; निधुवन, धनलव; 23. विपुलमतिभि.

इत्थं मानद नातिदूरमुभयोरप्यावयोरन्तरं
  यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निस्पृहाः ॥ २४ ॥

अभुक्तायां यस्यां क्षणमपि न यातं नृपशतै-
  र्भुवस्तस्या लाभे क इव बहुमानः क्षितिभुजाम् ॥
तदंशस्याप्यंशे तदवयवलेशेऽपि पतयो
  विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ॥ २५ ॥

मृत्पिण्डो जलरेखया वलयितः सर्वोऽप्ययं नन्वणु-
  * र्भागीकृत्य तमेव संयुगशतै राज्ञां * गणा भुञ्जते ॥
* तद्दद्युर्ददतेऽथवा न किमपि क्षुद्रा दरिद्रा भृशं
  धिग्धिक्तान्पुरुषाधमान् * धनकणं वाञ्छन्ति तेभ्योपि ये
॥ २६ ॥

न नटा न विटा न * गायना
  न परद्रोहनिबद्धबुद्धयः ॥
नृपसद्मनि नाम के वयं
  कुचभारानमिता न योषितः ॥ २७ ॥

पुरा * विद्वत्तासीदुपशमवतां क्लेशहतये
  गता कालेनासौ विषयसुखसिद्ध्यै विषयिणाम् ॥
इदानीं तु प्रेक्ष्य क्षितितलभुजः शास्त्रविमुखा-
  नहो कष्टं सापि प्रतिदिनमधोऽधः प्रविशति ॥ २८ ॥

स जातः कोप्यासीन्मदनरिपुणा मूर्ध्नि धवलं
  कपालं यस्योच्चैर्विनिहितमलंकारविधये ॥
नृभिः * प्राणत्राणप्रवणमतिभिः कैश्चिदधुना
  नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥ २९ ॥

---

26. रङ्गीकृत्य तमेव; गणैर्भुज्यते; नो दद्युर्ददतेऽथवा किमपि ते; धनकणान्; 7. गायका; 28. विद्वत्तासीदमलिनधियां; 29. प्राणत्राणप्रबलमतिभि

* अर्थानामीशिषे त्वं वयमपि च * गिरामीश्महे यावदर्थं
शूरस्त्वं * वादिदर्पज्वरशमनविधावक्षयं पाटवं नः ॥
सेवन्ते त्वां धनाढ्या * मतिमलहतये मामपि श्रोतुकामा
मय्यप्यास्था न * चेत्त्वयि मम सुतरामेष राजन्गतोस्मि॥३०

यदा किंचिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ॥
यदा किंचित्किंचिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ ३१ ॥

अतिक्रान्तः कालो * लटभललनाभोगसुभगो
भ्रमन्तः श्रान्ताः स्मः सुचिरमिह * संसारसरणौ ॥
इदानीं स्वःसिन्धोस्तटभुवि समाक्रन्दनगिरः
सुतारैः फूत्कारैः शिव शिव शिवेति प्रतनुमः ॥ ३२ ॥

माने * म्लायति खण्डिते च वसुनि व्यर्थं प्रयातेऽर्थिनि
क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने ॥
युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः-
* पूतग्रावगिरीन्द्रकन्दरतटीकुञ्जे निवासः क्वचित् ॥ ३३ ॥

परेषां चेतांसि प्रतिदिवसमाराध्य * बहु हा
प्रसादं किं नेतुं विशसि हृदय * क्लेशकलिलम् ॥
प्रसन्ने * त्वय्यन्तः स्वयमुदितचिन्तामणिगुणे
विमुक्तः संकल्पः किमभिलषितं पुष्यति न ते ॥ ३४ ॥

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
* माने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ॥

---

30. अर्थानामीश्वरस्त्वं; गिरामीश्वरा; वाग्मि; ह्यतिविमलधियो; चेत्त्वय्यपि, ते चेत्त्वयि; 32. ललितललनाभोगसुखदो; संसारसरणीम्; 33. म्लायिनि; °दरीकुञ्जे; 34. बहुधा; क्लेशकलितम्, क्लेशमफलम्; त्वय्येव; 35. मौने.

शास्त्रे * वादभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥ ३५ ॥

अमीषां प्राणानां तुलितबिसिनीपत्रपयसां
कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम् ॥
* यदाढ्यानामग्रे * द्रविणमदनिःसंज्ञमनसां
कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥ ३६ ॥

* रम्या सा नगरी महान्स नृपतिः सामन्तचक्रं च त-
त्पार्श्वे तस्य च * सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ॥
* उद्रिक्तः स च राजपुत्रनिवहस्ते बन्दिनस्ताः कथाः
सर्वं यस्य * वशादगात्स्मृतिपथं कालाय तस्मै नमः ॥ ३७ ॥

वयं येभ्यो * जाताश्चिरमपगता एव खलु ते
समं यैः संवृद्धाः * स्मृतिविषयतां तेऽपि गमिताः ॥
इदानीमेते स्मः प्रतिदिवसमासन्नपतना त्
* गतास्तुल्यावस्थां सिकतिलनदीतीरतरुभिः ॥ ३८ ॥

* यत्रानेके क्वचिदपि गृहे तत्र तिष्ठत्यथैको
यत्राप्येकस्तदनु बहवस्तत्र * नैकोऽपि चान्ते ॥
इत्थं चेमौ रजनिदिवसौ दोलयन्द्वाविवाक्षौ
कालः काल्या * भुवनफलके क्रीडति * प्राणिसारैः ॥ ३९ ॥

तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं
गुणोदारान्दारानुत परिचरामः * सविनयम् ॥
पिबामः शास्त्रौघानुत विविधकाव्यामृतरसा-
न्न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ॥ ४० ॥

---

35. वादि. 36. यदज्ञाना; ०निःशङ्कमनसां. 37. भ्रातः कष्टमहो; सापि राजपरिषत्; सद्वृत्तः; ०स्मृतिपदं. 38. जाताश्चिरपरिगता, जाताश्चिरतरगता; स्मरणपदवीं; द्रुता. 39. यत्रानेकः; चान्ते न चैकः; सह बहुकलः; प्राणिशारैः. 40. सविनयान्.

गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ॥
किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः
* कण्डूयन्ते जरठहरिणाः शृङ्गमङ्गे मदीये ॥ ४१ ॥

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने
* सुखासीनाः शान्तध्वनिषु रजनीषु द्युसरितः ॥
भवाभोगोद्विग्नाः शिव शिव * शिवेत्युच्चवचसा
कदा स्यामानन्दोद्गतबहुलबाष्पाप्लुतदृशः ॥ ४२ ॥

महादेवो देवः सरिदपि च सैवामरसरि-
द्गुहा एवागारं वसनमपि ता एव हरितः ॥
सुहृद्वा कालोयं * व्रतमिदमदैन्यव्रतमिति
कियद्वा वक्ष्यामो वटविटप एवास्तु दयिता ॥ ४३ ॥

शिरः शार्वं * स्वर्गात्पशुपतिशिरस्तः क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ॥
* अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ ४४ ॥

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा * धैर्यद्रुमध्वंसिनी ॥
मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥४५॥

आसंसारं त्रिभुवनमिदं चिन्वतां तात तादृ-
ङ्नैवास्माकं नयनपदवीं श्रोत्रवर्त्मागतो वा ॥

41. संप्राप्स्यन्ते जरठहरिणाः शृङ्गकण्डूविनोदम्, कण्डूयन्ते जरठहरिणाः स्वाङ्गमङ्के मदीये. 42. समासीनाः; शिवेत्यार्तवचसा, शिवेत्यार्तवचसः, शिवेत्यार्त-वचसः 43. ०मदैन्यव्रतमिदं. 44. स्वर्गात्पतति शिरसस्तत्, स्वर्गात्पतति शिरसोऽतः; अधो गङ्गा सेयं. 45. धर्म.

योयं धत्ते * विषयकरिणीगाढरूढाभिमान-
क्षीबस्यान्तःकरणकरिणः संयमालानलीलाम् ॥ ४६ ॥

ये वर्धन्ते धनपतिपुरःप्रार्थनादुःखभाजो
ये चाल्पत्वं दधति विषयाक्षेपपर्यस्तबुद्धेः ॥
तेषामन्तःस्फुरितहसितं वासराणां स्मरेयं
ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः ॥ ४७ ॥

विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं
शुश्रूषापि समाहितेन मनसा पित्रोर्न संपादिता ॥
* आलोलायतलोचना युवतयः स्वप्नेऽपि नालिङ्गिताः
कालोयं परपिण्डलोलुपतया काकैरिव * प्रेरितः ॥ ४८ ॥

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः
स्मरन्तः संसारे * विगुणपरिणामा विधिगतीः ॥
वयं पुण्यारण्ये * परिणतशरच्चन्द्रकिरणां
त्रियामां नेष्यामो हरचरणचित्तैकशरणाः ॥ ४९ ॥

वयमिह परितुष्टा वल्कलैस्त्वं * दुकूलैः
सम इह परितोषो निर्विशेषो विशेषः ॥
स तु * भवतु दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः ॥ ५० ॥

* यदेतत्स्वच्छन्दं विहरणमकार्पण्यमशनं
सहार्यैः संवासः श्रुतमुपशमैकव्रतफलम् ॥
मनो मन्दस्पन्दं बहिरपि चिरस्यापि विमृश-
न्न जाने कस्यैषा परिणतिरुदारस्य तपसः ॥ ५१ ॥

---

46. गाढगूढाभिमान; 48. ०लोचनाः प्रियतमाः; प्रेषितः; 49. विरसपरिणामां
ाधिगतिम्, विगुणपरिणामावधिगतिम्; किरणैस्त्रियामां, किरणे त्रियामां; 50. च
ाक्ष्म्या; भवति; 51. यदेतत्स्वाच्छन्द्यं.

पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्षमक्षय्यमन्नं
विस्तीर्णं * वस्त्रमाशादशकमपमलं तल्पमस्वल्पमूर्वी ॥
येषां * निःसङ्गतान्तःकरणपरिणतिः स्वात्मसंतोषिणस्ते
धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥५२॥

* दुराराध्याश्चामी तुरगचलचित्ताः क्षितिभुजो
वयं तु स्थूलेच्छा * महति च पदे बद्धमनसः ॥
जरा देहं मृत्युर्हरति * सकलं जीवितमिदं
सखे नान्यच्छ्रेयो जगति विदुषोऽन्यत्र तपसः ॥ ५३

भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला
आयुर्वायुविघट्टिताभ्रपटलीलीनाम्बुवद्भङ्गुरम् ॥
लोला * यौवनलालना * तनुभृतामित्याकलय्य द्रुतं
योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विधध्वं बुधाः ॥ ५४ ॥

पुण्ये ग्रामे वने वा महति सितपटच्छन्नपालीं कपालीं
मादाय * न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठम् ॥
द्वारं द्वारं * प्रवृत्तो वरमुदरदरीपूरणाय क्षुधार्तो
मानी प्राणी * स्वदेशे न पुनरनुदिनं तुल्यकुल्येषु दीनः॥५५॥

चाण्डालः किमयं द्विजातिरथवा शूद्रोऽथ किं तापसः
किंवा * तत्त्वविवेकपेशलमतिर्योगीश्वरः कोपि किम् ॥
* इत्युत्पन्नविकल्पजल्पमुखरैः संभाष्यमाणा जनै-
र्न क्रुद्धाः पथि नैव तुष्टमनसो यान्ति स्वयं योगिनः ॥ ५६ ॥

---

52. वस्त्रमाशासुदशकममलं, वस्त्रमाशादशकममलिनं; निःसङ्गताङ्गीकरण; 53. दुराराध्यः स्वामी; सुमहति; दयितं: 54. यौवनलालसा; जल रयाच्चेत्याकलय्य; 55. ज्ञानगर्भं; प्रविष्टो; स धन्यो; 56. तत्त्वनिवेश; ०मुखरैराभाष्यमाणा, ०मुखरैराभाव्यमाना.

अहो धन्याः केचित्त्रुटितभवबन्धव्यतिकरा
* वनान्तेऽचिन्वन्तो विषमविषयाशीविषगतिम् ॥
शरच्चन्द्रज्योत्स्नाधवलगगनाभोगसुभगां
नयन्ते ये रात्रिं * सुकृतचयचिन्तैकशरणाः ॥ ५७ ॥

एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रय
श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षं क्षणात् ॥
शान्तं भावमुपैहि संत्यज निजां कल्लोललोलां गतिं
मा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना ॥ ५८ ॥

पुण्यैर्मूलफलैः * प्रियैश्च सलिलैर्वृत्तिं कुरुष्वाधुना
भूशय्यानववल्कलैरकरुणैरुत्तिष्ठ यामो * वनम् ॥
क्षुद्राणामविवेकमूढमनसां यत्रेश्वराणां सदा
* वित्तव्याधिविकारविह्वलगिरां नामापि न श्रूयते ॥ ५९ ॥

मोहं मार्जय तामुपार्जय रतिं चन्द्रार्धचूडामणौ
चेतः स्वर्गतरङ्गिणीतटभुवामासङ्गमङ्गीकुरु ॥
को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च स्त्रीषु च
ज्वालाग्रेषु च पन्नगेषु च सरिद्वेगेषु च प्रत्ययः ॥ ६० ॥

अग्रे गीतं सरसकवयः पार्श्वतो दाक्षिणात्याः
पृष्ठे लीलावलयरणितं चामरग्राहिणीनाम् ॥
यद्यस्त्येवं कुरु भवरसास्वादने लम्पटत्वं
नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ ६१ ॥

विरमत बुधा योषित्सङ्गात्सुखात्क्षणभङ्गुरा-
त्कुरुत करुणामैत्रीप्रज्ञावधूजनसंगमम् ॥

---

57. वनान्ते चित्तान्तर्विषमविषयाशीविषगताः; ०चित्तैकशरणाः. 59. प्रिये
णायिनि वृत्तिं, प्रियप्रणयिनीं वृत्तिं; भूशय्यानववल्कलैरकृपणै, भूशय्यां नवपल्लवैः कुरु
ृणै; वने; चित्तव्याध्यविवेक, वित्तव्याध्यविवेक.

न खलु नरके हाराक्रान्तं घनस्तनमण्डलं
शरणमथवा श्रोणीबिम्बं रणन्मणिमेखलम् ॥ ६२ ॥

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ॥
तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः * सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥ ६३ ॥

मातर्लक्ष्मि भजस्व कंचिदपरं मत्काङ्क्षिणी मा स्म भू-
र्भोगेभ्यः स्पृहयालवो न हि वयं का निस्पृहाणामसि ॥
सद्यःस्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृते
* भिक्षासक्तुभिरेव संप्रति वयं वृत्तिं समीहामहे ॥ ६४ ॥

यूयं वयं वयं यूयमित्यासीन्मतिरावयोः
किं जातमधुना येन यूयं यूयं वयं वयम् ॥ ६५ ॥

बाले लीलामुकुलितममी मन्थरा दृष्टिपाताः
किं क्षिप्यन्ते विरम विरम व्यर्थ एष श्रमस्ते ॥
संप्रत्यन्ये वयमुपरतं बाल्यमास्था वनान्ते
क्षीणो मोहस्तृणमिव जगज्जालमालोकयामः ॥ ६६ ॥

इयं बाला मां प्रत्यनवरतमिन्दीवरदल-
प्रभाचोरं चक्षुः क्षिपति किमभिप्रेतमनया ॥
गतो मोहोऽस्माकं स्मरकुसुमबाणव्यतिकर-
ज्वरज्वाला शान्ता तदपि न वराकी विरमति ॥ ६७ ॥

रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गेयादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकं प्रीतये ॥
किं * तूद्भ्रान्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुर-
च्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः ॥ ६८ ॥

63. ०ष्वनुपहतगतिः. 64. भिक्षावस्तुभि. 68. तूद्भ्रान्तपतङ्गपक्ष.

किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः
प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलिन्यश्च शाखाः॥
वीक्ष्यन्ते यन्मुखानि प्रसभमपगतप्रश्रयाणां खलानां
* दुःखोपात्ताल्पवित्तस्मयपवनवशान्नर्तितभ्रूलतानि ॥ ६९ ॥

* गङ्गातरङ्गहिमशीकरशीतलानि
विद्याधराध्युषितचारुशिलातलानि ॥
स्थानानि किं हिमवतः प्रलयं गतानि
यत्सावमानपरपिण्डरता मनुष्याः ॥ ७० ॥

यदा मेरुः श्रीमान्निपतति युगान्ताग्निनिहतः
समुद्राः शुष्यन्ति * प्रचुरनिकरग्राहनिलयाः ॥
धरा गच्छत्यन्तं धरणिधरपादैरपि धृता
शरीरे का वार्ता करिकलभकर्णाग्रचपले ॥ ७१ ॥

एकाकी निस्पृहः शान्तः पाणिपात्रो दिगम्बरः ॥
कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥ ७२ ॥

प्राप्ताः श्रियः सकलकामदुघास्ततः किं
दत्तं पदं शिरसि विद्विषतां ततः किम् ॥
* संमानिताः प्रणयिनो विभवैस्ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ॥ ७३ ॥

जीर्णा कन्था ततः किं * सितममलवरं पट्टवस्त्रं ततः कि-
मेका भार्या ततः किं * हयकरिसुगणैरावृतो वा ततः किम् ॥
भक्तं भुक्तं ततः किं कदशनमथवा वासरान्ते ततः किं
व्यक्तज्योतिर्न * चान्तर्मथितभवभयं वैभवं वा ततः किम्
॥ ७४ ॥

---

69. ०स्मयवशपवनानर्तित; 70. तरङ्गकणशीकर; 71. प्रचुरसलिल; 73. सन्मानिताः; 74. सितममलपटं पट्टसूत्रं; शतगुणगुणिता कोटिरेका; वान्तर्मथित.

भक्तिर्भवे मरणजन्मभयं हृदिस्थं
स्नेहो न बन्धुषु न मन्मथजा विकाराः ॥
संसर्गदोषरहिता विजना वनान्ता
वैराग्यमस्ति किमतः परमर्थनीयम् ॥ ७५ ॥

तस्मादनन्तमजरं परमं विकासि
तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पैः ॥
यस्यानुषङ्गिण इमे भुवनाधिपत्य-
भोगादयः कृपणलोकमता भवन्ति ॥ ७६ ॥

पातालमाविशसि यासि नभो विलङ्घ्य
दिङ्मण्डलं भ्रमसि मानस चापलेन ॥
* भ्रान्त्याऽपि जातु विमलं कथमात्मनीनं
तद्ब्रह्म न स्मरसि निर्वृतिमेषि येन ॥ ७७ ॥

रात्रिः सैव पुनः स एव दिवसो * मत्वाऽबुधा जन्तवो
धावन्त्युद्यमिनस्तथैव निभृतप्रारब्धतत्तत्क्रियाः ॥
व्यापारैः * पुनरुक्तभुक्तविषयैरेवंविधेनामुना
संसारेण * कदर्थिताः कथमहो मोहान्न लज्जामहे ॥ ७८ ॥

मही रम्या शय्या विपुलमुपधानं भुजलता
वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः ।
* स्फुरद्दीपश्चन्द्रो विरतिवनितासङ्गमुदितः
सुखं शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥ ७९ ॥

त्रैलोक्याधिपतित्वमेव विरसं यस्मिन्महाशासने
* तल्लब्ध्वाशनवस्त्रमानघटने भोगे रतिं मा कृथाः ॥
भोगः कोपि स एक एव परमो नित्योदितो जृम्भते ॥
यत्स्वादाद्विरसा भवन्ति * विषयास्त्रैलोक्यराज्यादयः ॥८०॥

---

77. भ्रान्त्वाऽपि; 78. मत्वा मुधा; पुनरुक्तभूत; कदर्थिता वय. 79. शरच्चन्द्रो दीपो; 80 तल्लब्ध्वासन; विभवा.

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः
स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः ॥
मुक्त्वैकं भवबन्धदुःखरचनाविध्वंसकालानलं
स्वात्मानन्दपदप्रवेशकलनं * शेषा वणिग्वृत्तयः ॥ ८१ ॥

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्री-
रर्थाः संकल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूराः ॥
कण्ठाश्लेषोपगूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं
ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरीतुम् ॥८२॥

ब्रह्माण्डमण्डलीमात्रं किं लोभाय मनस्विनः ॥
शफरीस्फुरितेनाब्धेः क्षुब्धता * जातु जायते ॥ ८३ ॥

यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं
तदा दृष्टं नारीमयमिदमशेषं * जगदपि ॥
इदानीमस्माकं पटुतरविवेकाञ्जनजुषां
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ ८४ ॥

रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तस्थली
* रम्यं साधुसुहृत्समागमसुखं काव्येषु रम्याः कथाः ॥
कोपोपाहितबाष्पबिन्दुतरलं रम्यं प्रियाया मुखं
सर्वं रम्यमनित्यतामुपगते चित्ते न किंचित्पुनः ॥ ८५ ॥

भिक्षाशी जनमध्यसङ्गरहितः स्वायत्तचेष्टः सदा
दानादानविरक्तमार्गनिरतः कश्चित्तपस्वी स्थितः ॥
* रथ्याकीर्णविशीर्णजीर्णवसनैरास्यूतकन्थाधरो
निर्मानो निरहंकृतिः शमसुखाभोगैकबद्धस्पृहः ॥ ८६ ॥

---

81. शेषैर्वणिग्वृत्तिभिः; 83. न तु; 84. जगदिति; 85. रम्यः साधुसमागमः शमसुखं, रम्यं साधुसमागमोद्भवसुखं; 86. रथ्याक्षीणविशीर्णजीर्णवसनैः संप्राप्तकन्थासखो, रथ्याक्षीणविशीर्णजीर्णवसनैः संप्रोतकन्थाधरो.

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल
भ्रातर्व्योम निबद्ध * एष भवतामन्त्यः प्रणामाञ्जलिः ॥
युष्मत्सङ्गवशोपजातसुकृतोद्रेकस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परे ब्रह्मणि ॥ ८७ ॥

यावत्स्वस्थमिदं * शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ॥
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
* संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥ ८८ ॥

नाभ्यस्ता भुवि वादिवृन्ददमनी विद्या विनीतोचिता
खड्गाग्रैः करिकुम्भपीठदलनैर्नाकं न नीतं यशः ॥
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये
तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत् ॥ ८९ ॥

ज्ञानं सतां मानमदादिनाशनं
केषांचिदेतन्मदमानकारणम् ॥
स्थानं विविक्तं यमिनां विमुक्तये
कामातुराणामतिकामकारणम् ॥ ९० ॥

जीर्णा एव मनोरथाः स्वहृदये यातं * च तद्यौवनं
हन्ताङ्गेषु गुणाश्च वन्ध्यफलतां याता गुणज्ञैर्विना ॥
किं युक्तं सहसाभ्युपैति * बलवान्कालः कृतान्तोऽक्षमी
* हा ज्ञातं स्मरशासनाङ्घ्रियुगलं मुक्त्वास्ति नान्या गतिः
॥ ९१ ॥

* तृषा शुष्यत्यास्ये पिबति सलिलं * स्वादु सुरभि
क्षुधार्तः सञ्शालीन्कवलयति शाकादिवलितान् ॥
प्रदीप्ते रागाग्नौ सुदृढतरमाश्लिष्यति वधूं
प्रतीकारो व्याधेः सुखमिति विपर्यस्यति जनः ॥ ९२ ॥

---

87. एव भवतामेष, एष भवतामग्रे; 88. कलेवरगृहं यावच्च दूरे जरा; प्रोद्दीप्ते; 91. जरां यौवनम्; बलवान्कालो हि सर्वान्तकृत्; ह्याज्ञातं; 92. तृषार्तः सन्प्राणी; शीतमधुरम्.

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां
ध्येये ध्यानं नियोज्य * क्षितिधरकुहरग्रावपर्यङ्कमूले ॥
* आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात्स्मरारे
* दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥९३॥

शय्या शैलशिला गृहं गिरिगुहा वस्त्रं तरूणां त्वचः
सारङ्गाः सुहृदो ननु क्षितिरुहां वृत्तिः फलैः कोमलैः ॥
येषां * नैर्झरमम्बुपानमुचितं * रत्यै च विद्याङ्गना
मन्ये ते परमेश्वराः शिरसि यैर्बद्धो न सेवाञ्जलिः ॥ ९४ ॥

सत्यामेव त्रिलोकीसरिति हरशिरश्चुम्बिनीविच्छटायां
सद्वृत्तिं कल्पयन्त्यां * तटविटपिभवैर्वल्कलैः सत्फलैश्च ॥
कोऽयं विद्वान्विपत्तिज्वरजनितरुजातीव * दुःखासिकानां
वक्त्रं वीक्षेत दुःस्थे यदि हि न बिभृयात्स्वे कुटुम्बेऽनुकम्पाम्
॥ ९५ ॥

उद्यानेषु विचित्रभोजनविधिस्तीव्रातितीव्रं तपः
कौपीनावरणं सुवस्त्रममितं भिक्षाटनं मण्डनम् ॥
आसन्नं मरणं च मङ्गलसमं यस्यां समुत्पद्यते
तां काशीं परिहृत्य हन्त विबुधैरन्यत्र किं स्थीयते ॥ ९६ ॥

नायं ते समयो रहस्यमधुना निद्रातिनाथो यदि
स्थित्वा द्रक्ष्यति कुप्यति प्रभुरिति द्वारेषु येषां वचः ॥
चेतस्तानपहाय याहि भवनं देवस्य विश्वेषितु-
र्निर्दौवारिकनिर्दयोक्त्यपरुषं निःसीमशर्मप्रदम् ॥ ९७ ॥

* प्रियसख विपद्दण्डप्रान्तप्रपातपरम्परा-
परिचयचले चिन्ताचक्रे निधाय विधिः खलः ॥

---

93. ग्रावशय्यानिषण्णः; आत्मारामोपलीनो; दुःखान्मोक्ष्ये कदाहं तव चरणरतो ध्यानमार्गैकप्रश्नः; 94. निर्झर; रत्यैव; 95. वटविटपभवै; दुस्वासिकानां दुःखास्विकानां; 98. प्रियसखि विपद्दण्डव्रातप्रताप.

मृदमिव बलात्पिण्डीकृत्य प्रगल्भकुलालव-
क्रमयति मनो नो जानीमः किमत्र विधास्यति ॥ ९८ ॥

महेश्वरे वा जगतामधीश्वरे
जनार्दने वा जगदन्तरात्मनि ॥
* तयोर्न भेदप्रतिपत्तिरस्ति मे
तथापि भक्तिस्तरुणेन्दुशेखरे ॥ ९९ ॥

रे कन्दर्प करं कदर्थयसि किं * कोदण्डटङ्कारितैः
रे रे कोकिल कोमलैः कलरवैः किं त्वं वृथा * जल्पसि ॥
मुग्धे * स्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षैरलं ॥
चेतश्चुम्बितचन्द्रचूडचरणध्यानामृतं वर्तते ॥ १०० ॥

कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी
निश्चिन्तं सुखसाध्यभैक्षमशनं शय्या श्मशाने वने ॥
मित्रामित्रसमानता * पशुपतेश्चिन्ताऽथ शून्यालये
* ध्वस्ताशेषमदप्रमादमुदितो योगी सुखं तिष्ठति ॥ १०१ ॥

भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भव-
* स्तत्कस्येह कृते * परिभ्रमत रे लोकाः कृतं चेष्टितैः ॥
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां
कामोच्छित्तिवशे स्वधामनि यदि श्रद्धेयमस्मद्वचः ॥ १०२ ॥

धन्यानां गिरिकन्दरे निवसतां ज्योतिः परं ध्यायता-
मानन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमङ्केशयाः ॥
अस्माकं तु * मनोरथोपरचितप्रासादवापीतट-
क्रीडाकाननकेलिकौतुकजुषामायुः * परिक्षीयते ॥ १०३ ॥

---

99. न वस्तुभेद; न भेदहेतु; 100. कोदण्डटङ्कारवैः; वल्गसि;० मधुराक्षेपैः; 101. प्रतिविमला चिन्तातिशून्यालये; ध्वस्ताशेषतमःप्रमोद; स्वात्मानन्दमदप्रमोद. 102. स्तत्कस्यैव; परिभ्रमथ; 103. मनोरथैः परिचित; परं क्षीयते.

* आघ्रातं मरणेन जन्म जरया विद्युच्चलं यौवनं
संतोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमैः ॥
लोकैर्मत्सरिभिर्गुणा * वनभुवो व्यालैर्नृपा दुर्जनै-
रस्थैर्येण * विभूतयोऽप्युपहता ग्रस्तं न किं केन वा ॥ १०४ ॥

आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्यापदः ॥
जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसा-
त्तत्किं नाम निरङ्कुशेन विधिना यन्निर्मितं * सुस्थितम् ॥ १०५॥

कृच्छ्रेणामेध्यमध्ये * नियमिततनुभिः स्थीयते * गर्भवासे
कान्ताविश्लेषदुःखव्यतिकरविषमे यौवने विप्रयोगः ॥
नारीणामप्यवज्ञा विलसति नियतं वृद्धभावोऽप्यसाधुः
संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित्
॥ १०६ ॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ॥
शेषं * व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे * वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥१०७॥

* ब्रह्मज्ञानविवेकिनोऽमलधियः कुर्वन्त्यहो दुष्करम्
* यन्मुञ्चन्त्युपभोगवन्त्यपि धनान्येकान्ततो निस्पृहाः ॥
न प्राप्तानि पुरा न संप्रति न च प्राप्तो दृढप्रत्ययो
वाञ्छामात्रपरिग्रहाण्यपि परं त्यक्तुं न * शक्ता वयम् ॥१०८॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहम् ॥

---

104. आक्रान्तं; स्तु पवनो; विभूतिरप्यपहृता. 105. सुस्तिरम्. 106. नेयमितऋतुभिः; गर्भमध्ये; गर्भगर्ते. 107. व्याधिविदेश; ०बुद्बुदसमे. 108. ०विवेकनिर्मलधियः; यन्मुञ्चन्त्युपभोगकाञ्चनधना, यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धना; तानि क्षमाः.

* आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रम् ॥ १०९ ॥

सृजति तावदशेषगुणाकरं
पुरुषरत्नमलंकरणं भुवः ॥
तदपि तत्क्षणभङ्गि करोति चे-
दहह कष्टमपण्डितता विधेः ॥ ११० ॥

गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दन्तावलि-
र्दृष्टिर्नश्यति वर्धते बधिरता वक्त्रं च लालायते ॥
वाक्यं नाद्रियते च बान्धवजनो भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते ॥ १११ ॥

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः
जराजीर्णैरङ्गैर्नट इव वलीमंडिततनु-
र्नरः संसारान्ते विशति यमधानीजवनिकाम् ॥ ११२ ॥

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्ठे वा कुसुमशयने वा दृषदि वा ॥
तृणे वा स्त्रैणे वा मम समदृशो * यान्तु दिवसाः
* क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥ ११३ ॥

MISCELLANEOUS.

आकिंचनस्य दान्तस्य शान्तस्य समचेतसः ॥
सदा संतुष्टमनसः सर्वाः सुखमया दिशः ॥ १ ॥

---

109. आयुश्च संस्रवति. 113. यान्ति; क्वचित्पुण्येऽरण्ये.

अनावर्ती कालो व्रजति स वृथा तन्न गणितं
दशास्तास्ताः सोढा * व्यसनशतसंपातविधुराः ॥
कियद्वा वक्ष्यामः किमिव * बत नात्मन्यपकृतं
* त्वया यावत्तावत्पुनरपि तदेव व्यवसितम् ॥ २ ॥

अभिमतमहामानग्रन्थिप्रभेदपटीयसी
गुरुतरगुणग्रामाम्भोजस्फुटोज्वलचन्द्रिका ॥
* विपुलविलसल्लज्जावल्लीविदारकुठारिका
जठरपिठरी * दुष्पूरेयं करोति विडम्बनम् ॥ ३ ॥

अश्नीमहि वयं भिक्षामाशावासो वसीमहि ॥
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरः ॥ ४ ॥

उत्तिष्ठ क्षणमेकमुद्वह गुरुं दारिद्र्यभारं सखे
श्रान्तस्तावदहं चिरं मरणजं सेवे त्वदीयं सुखम् ॥
* इत्युक्तो धनवर्जितेन सहसा गत्वा श्मशाने शवो
दारिद्र्यान्मरणं वरं वरमिति ज्ञात्वैव तूष्णीं स्थितः ॥ ५ ॥

उदन्वच्छन्ना भूः स च निधिरपां योजनशतं
सदा पान्थः पूषा गगनपरिमाणं कलयति ॥
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥ ६ ॥

एको देवः केशवो वा शिवो वा
एकं मित्रं भूपतिर्वा यतिर्वा ॥
एको वासः पत्तने वा वने वा
एका भार्या सुन्दरी वा दरी वा ॥ ७ ॥

एको रागिषु राजते प्रियतमादेहार्धहारी हरो
नीरागेषु जनो विमुक्तललनासङ्गो न यस्मात्परः ॥

---

2. व्यसनशतसंताप; च तदा; किमस्माभिर्यावत्. 3. ०वल्लीवितान; दुःपूरेयं.
5. इत्युक्तं धनवर्जितस्य वचनं श्रुत्वा.

दुर्वारस्मरबाणपन्नगविषव्याविद्धमुग्धो जनः
 शेषः कामविडम्बितान्न विषयान्भोक्तुं न मोक्तुं क्षमः ॥ ८ ॥

एता हसन्ति च रुदन्ति च * कार्यहेतो-
 र्विश्वासयन्ति च परं न च विश्वसन्ति ॥
तस्मान्नरेण कुलशीलसमन्वितेन
 * नार्यः श्मशानघटिका इव वर्जनीयाः ॥ ९ ॥

कदा वाराणस्याममरतटिनीरोधसि वस-
 न्वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ॥
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
 प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ १० ॥

कार्कश्यं स्तनयोर्दृशोस्तरलतालीकं मुखे श्लाघ्यते
 कौटिल्यं कचसंचये * प्रवचने मान्द्यं त्रिके स्थूलता ॥
भीरुत्वं हृदये सदैव कथितं * मायाप्रयोगः प्रिये
 यासां दोषगणो गुणा मृगदृशां ताः * स्युः पशूनां प्रियाः ॥ ११ ॥

* क्वचिद्वीणावाद्यं क्वचिदपि च हाहेति रुदितं
 क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः ॥
क्वचिद्रामा रम्याः क्वचिदपि गलत्कुष्ठवपुषो
 न जाने संसारः किममृतमयः किं विषमयः ॥ १२ ॥

गात्रैर्गिरा च विकलश्चटुमीश्वराणां
 कुर्वन्नयं प्रहसनस्य नटः कृतोऽसि ॥
तं त्वां पुनः पलितकर्णकभाजमेनं
 नाट्येन केन नटयिष्यति दीर्घमायुः ॥ १३ ॥

* * * * ॥ १४ ॥

---

9. वित्तहेतो; वेश्याः. 11. च वदने; मायाप्रयोगप्रिये; किं नराणां प्रियाः.
12. क्वचिद्वीणावादः.

चला लक्ष्मीश्चलाः प्राणाश्चलं जीवितयौवनम् ॥
चलाचले च संसारे धर्म एको हि निश्चलः ॥ १५ ॥

चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभासुरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ॥
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटयं-
श्चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १६ ॥

चेतश्चिन्तय मा रमां सकृदिमामस्थायिनीमास्थया
* भूपालभ्रुकुटीकुटीविहरणव्यापारपण्याङ्गनाम् ॥
कन्थाकञ्चुकिताः प्रविश्य भवनद्वाराणि वाराणसी-
रथ्यापङ्क्तिषु पाणिपात्रपतितां भिक्षामपेक्षामहे ॥ १७ ॥

जातः कूर्मः स एकः * पृथुभुवनभरायार्पितं येन पृष्ठं
श्लाघ्यं जन्म ध्रुवस्य भ्रमति नियमितं यत्र तेजस्विचक्रम् ॥
संजातव्यर्थपक्षाः परहितकरणे नोपरिष्टान्न चाधो
ब्रह्माण्डोदुम्बरान्तर्मशकवदपरे जन्तवो जातनष्टाः ॥ १८ ॥

तुङ्गं वेश्म सुताः सतामभिमताः संख्यातिगाः संपदः
कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ॥
मत्वा विश्वमनश्वरं निविशते संसारकारागृहे
संदृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु संन्यस्यति ॥ १९ ॥

ददतु ददतु गालीर्गालिमन्तो भवन्तो
वयमपि तदभावाद्गालिदानेऽसमर्थाः ॥
जगति विदितमेतद्दीयते विद्यमानं
न हि शशकविषाणं कोपि कस्मै ददाति ॥ २० ॥

दूरादर्थं घटयति नवं दूरतश्चापशब्दं
त्यक्त्वा भूयो भवति निरतः सत्सभारञ्जनेषु ॥

---

17. ० कुटीरविहरव्यापार; 18. पृथुभुवनमथ स्थापितं येन पृष्ठे.

मन्दं मन्दं रचयति पदं लोकचित्तानुवृत्त्या
कामं मन्त्री कविरिव सदा खेदभारैरमुक्तः ॥ २१ ॥

न भिक्षा दुष्प्रापा पथि मम महारामरचिते
फलैः संपूर्णा * भूर्विपमृगसुचर्मापि वसनम् ॥
सुखैर्वा दुःखैर्वा सदृशपरिपाकः खलु तदा
त्रिनेत्रं कस्त्यक्त्वा धनलवमदान्धं प्रणमति ॥ २२ ॥

नो खड्गप्रविदारिताः करटिनो नोद्वेजिता वैरिण-
स्तन्वङ्ग्या विपुले * नितम्बफलके न क्रीडितं लीलया ॥
नो जुष्टं गिरिराजनिर्झरझणज्झांकारकारं * पयः
कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेरितः ॥ २३ ॥

परिभ्रमसि किं वृथा क्वचन चित्त विश्राम्यतां
स्वयं भवति यद्यथा भवति तत्तथा नान्यथा ॥
अतीतमपि न स्मरन्नपि च भाव्यसंकल्पय-
* न्नतर्कितगमागमाननुभवस्व भोगानिह ॥ २४ ॥

पाणिं पात्रयतां निसर्गशुचिना भैक्षेण संतुष्यतां
यत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यताम् ॥
अत्यागेपि तनोरखण्डपरमानन्दावबोधस्पृहां
मर्त्यः कोपि शिवप्रसादसुलभां संपत्स्यते योगिनाम् ॥ २५ ॥

पातालान्न विमोचितो बत बली नीतो न मृत्युः क्षयं
नो मृष्टं शशिलाञ्छनं च मलिनं नोन्मूलिता व्याधयः ॥
शेषस्यापि धरां विधृत्य न कृतो भारावतारः क्षणं
चेतः * सत्पुरुषाभिमानमनिशं मिथ्या वहत्खिद्यसे ॥ २६ ॥

22. भूर्भृंगविटपिचर्मापि; 23. निबद्धफलके; वयः; 24. न्नतर्कितसमागमा; 26. मृत्युक्षयं; सत्पुरुषाभिमानपदवीं मिथ्यैव किं खिद्यसे.

प्रशान्तशास्त्रार्थविचारचापलं
निवृत्तनानारसकाव्यकौतुकम् ॥
निरस्तनिःशेषविकल्पविस्तरं
प्रपत्तुमन्विच्छति शंकरं मनः ॥ २७ ॥

फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां
पयःस्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् ॥
मृदुस्पर्शा शय्या सुललितलतापल्लवमयी
सहन्ते संतापं तदपि धनिनां द्वारि कृपणाः ॥ २८ ॥

भव्यं * भक्तं ततः किं कदशितमथवा वासरान्ते ततः किं
कौपीनं वा ततः किं किमथ सितमहच्चाम्बरं वा ततः किम् ॥
एका भार्या ततः किं शतगुणगुणिता कोटिरेका ततः किं
त्वेको भ्रान्तस्ततः किं करितुरगशतैर्वेष्टितो वा ततः किम्
॥ २९ ॥

भिक्षा कामदुघा धेनुः कन्था शीतनिवारिणी ॥
अचला तु शिवे भक्तिर्विभवैः किं प्रयोजनम् ॥ ३० ॥

* भिक्षाहारमदैन्यमप्रतिसुखं भीतिच्छिदं सर्वदा
दुर्मात्सर्यमदाभिमानमथनं दुःखौघविध्वंसनम् ॥
सर्वत्रान्वहमप्रयत्नसुलभं साधुप्रियं पावनं
शम्भोः सत्रमवार्यमक्षयनिधिं शंसन्ति योगीश्वराः ॥ ३१ ॥

भूः पर्यङ्को निजभुजलता कन्दुकं खं वितानं
दीपश्चन्द्रो विरतिवनितालब्धसङ्गप्रमोदः ॥
* दिक्कान्ताभिः पवनचमरैर्वीज्यमानः समन्ता-
द्भिक्षुः शेते नृप इव भुवि त्यक्तसर्वस्पृहोऽपि ॥ ३२ ॥

भोगास्तुङ्गतरङ्गभङ्गचपलाः प्राणाः क्षणध्वंसिनः
स्तोकान्येव दिनानि यौवनसुखं प्रीतिः प्रियेष्वस्थिरा ॥

---

31. भुक्तं ततः किं कदशनमथवा; 32. ० मदैन्यमप्रतिहतं भीतिच्छिदं; दिक्कन्याभिः

* तत्संसारमसारमेव निखिलं बुद्ध्वा * बुधा बोधका
लोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम् ॥ ३३ ॥

यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटुं मृषा
नैषां गर्वगिरः शृणोषि न पुनः प्रत्याशया धावसि ।
काले बालतृणानि खादसि सुखं निद्रासि निद्रागमे
तन्मे ब्रूहि कुरङ्ग कुत्र भवता किं नाम तप्तं तपः ॥ ३४ ॥

यन्नागा * मदवारिभिन्नकरटास्तिष्ठन्ति निद्रालसा
द्वारे हेमविभूषणाश्च तुरगा वल्गन्ति यद्दर्पिताः ।
वीणावेणुमृदङ्गशङ्खपटहैः सुप्तस्तु यद्बोध्यते
तत्सर्वं सुरलोकदेवसदृशं धर्मस्य विस्फूर्जितम् ॥ ३५ ॥

यां चिन्तयामि सततं मयि सा * विरक्ता
* साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते * च परिशुष्यति काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च ॥ ३६ ॥

ये * संतोषनिरन्तरप्रमुदितास्तेषां न भिन्ना मुदो
ये त्वन्ये धनलोभसंकुलधियस्तेषां न तृष्णा हता ।
इत्थं कस्य कृते कृतः स विधिना * तादृक्पदं संपदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ ३७ ॥

वर्णं सितं शिरसि वीक्ष्य शिरोरुहाणां
स्थानं जरापरिभवस्य * यदेव पुंसाम् ।
आरोपितास्थिशकलं परिहृत्य यान्ति
चाण्डालकूपमिव दूरतरं तरुण्यः ॥ ३८ ॥

---

33. तत्तत्सारमसारमेव; बुधा यौवने; 35. मदभिन्नगण्डकरटा; 36. न रक्ता; सा चान्य; ऽपि परितुष्यति; 37. संतोषसुखप्रमोदमुदिता; तादृक्पति; 38. तदेव पुंसाम्, तदा पुमांसम्.

समारम्भा भग्नाः कति न कतिवारांस्तव पशो
पिपासोस्तुच्छेऽस्मिन्द्रविणमृगतृष्णार्णवजले ॥
तथापि प्रत्याशा विरमति न तेऽद्यापि शतधा
न दीर्णं यच्चेतो नियतमशनिग्रावघटितम् ॥ ३९ ॥

संमोहयन्ति मदयन्ति विडम्बयन्ति
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ॥
एताः प्रविश्य सदयं हृदयं नराणां
किं नाम वामनयना न समाचरन्ति ॥ ४० ॥

सिंहो बली द्विरदशूकरमांसभोजी
संवत्सरेण रतिमेति किलैकवारम् ॥
पारावतः खरशिलाकणमात्रभोजी
कामी भवत्यनुदिनं वद कोऽत्र हेतुः ॥ ४१ ॥

स्थितिः पुण्येऽरण्ये सह परिचयो हन्त हरिणैः
फलैर्मेध्या वृत्तिः प्रतिनदि च तल्पानि दृषदः ॥
इतीयं सामग्री भवति हरभक्तिं स्पृहयतां
वनं वा गेहं वा * सदृशमुपशान्तैकमनसाम् ॥ ४२ ॥

* स्वादिष्टं मधुनो घृताच्च * रसवद्यत्प्रस्रवत्यक्षरं
दैवी वागमृतात्मनो रसवतस्तेनैव तृप्ता वयम् ॥
कुक्षौ यावदिमे भवन्ति धृतये भिक्षाहृताः सक्तव-
स्तावद्दास्यकृतार्जितैर्न हि धनैर्वृत्तिं समीहामहे ॥ ४३ ॥

---

42. सदृशमुपशान्त्यैक. 43. स्वादिष्ठं; रसवद्या प्रस्रवत्यक्षरं.

NOTES & TRANSLATION.

According to Rhetoricians Bhartrihari's Nîtishataka and his other two Shatakás are Kávyás of the पद्य class belonging to the श्रव्य variety. Kávyás are either गद्य or पद्य which are subdivided into दृश्य and श्रव्य. A Kávya is variously defined, but the following definition may be taken as a comprehensive one:—रमणीयार्थप्रतिपादकः शब्दः काव्यम्. *Rasagangádhara.*

Sanskrit poets open their poems in three ways, either (1) by a benedictory passage, (2) by a salutation to the favourite Deity of the author, or (3) by a brief indication of the main subject of the poem:—आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्. *Kávyádarsha.* It is also the general usage among Sanskrit poets to have a मङ्गलाचरण, at the beginning of their writing, in which they invoke their favourite Deity to help them in their work. This they do by a direct appeal either to the Deity itself or to some of its attributes. Commentators are very particular as regards the necessity of a मङ्गलाचरण. If they fail to find a distinct invocation at the commencement of a poem they even go the length of remarking that the poet must have had a mental invocation (मानसिक मङ्गलाचरण). Bhartrihari has adopted the second method (नमस्क्रिया) in opening his present poem and has for his मङ्गलाचरण a salutation to the attributes of his favourite Deity—Sadáshiva. The devotion of our poet to Sadáshiva can be seen in Stanzas 99 and 100 of Vairágyashataka and in the frequent references to that Deity throughout both the Niti and Vairagyashatakas.

In a Ms. recently discovered we read the following as the first verse of Nitishataka:—युगादिदेवोऽप्ययुगादिदेवः पुरा द्वितीयोऽपि सदा द्वितीयः ॥ स पञ्चशाखोऽपि सहस्रशाखः सोऽमङ्गलो मङ्गलमातनोतु ॥ १ ॥

1. दिक्काला०—दिक्काल=Space and time; आदि refers to गुण, धर्म, &c. as well as to material objects which are themselves the recepients of गुण, धर्म &c. अनवच्छिन्न=*lit.* not अवच्छिन्न *i. e.* cut, measured; hence, unconditioned, undefined. अनन्त=Infinite. चिन्मात्र=Pure intelligence itself. मात्रं कार्त्स्न्येऽवधारणे *Amara.* न विद्यते अन्तः यस्य तत्=अनन्तम्; चिदेव चिन्मात्रम् (मयूरव्यंसकादि समासः). दिक्च कालश्च=दिक्कालौ; दिक्कालौ आदी येषां ते=दि० दयः तैः अनवच्छिन्नं अत एव अनन्तं चिन्मात्रं मूर्तिः यस्य तस्मै=दि० चि० मूर्तये. This is an adjectival clause to the neuter noun तेजस्. The usual form of the dative of this clause would, therefore, be ०मूर्तिने; but ०मूर्तये can also

be accounted for, since neuter adjectives ending in इ, उ, ऋ, take optionally the corresponding forms of the masculine in the singulars of the instrumental, dative, ablative, genitive and locative as also in the duals of the last two *e. g.* धात्रा—धातृणा; धात्रे—धातृणे; अनादये—अनादिने &c. by 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' *Panini* VII. i. 74. This compound may also be analysed as consisting of three adjectives दिक्कालाद्यनवच्छिन्न. अनन्त, and चिन्मात्रमूर्ति forming together a Karmadháraya. Several commentators have taken मूर्ति as the principal member of a Bahuvrihi compound, and all that precedes that word is made an adjective to it. We have, however, preferred to take चिन्मात्र as the principal member, since it is used to indicate one of the chief essences of the Divinity; and the previous portion as an adjective to it. Commentators have taken दिक्का०—च्छिन्नः; अनन्तः &c. in the masculine, which, however, cannot be accounted for with the विशेष्य 'तेजस्' in the neuter. स्वानुभू०—स्वानुभूति=Self-perception. एक=Principal, chief. एके मुख्यान्यकेवलाः *Amara.* मान=प्रमाण=Basis, the means of knowing. "मानं प्रमाणे प्रस्थादौ" *Hemakosha.* स्वानुभूतिरेव एकं मानं यस्य तस्मै=स्वा० मानाय. The commentary of the Ms. V1 dissolves this compound as:—स्वकीयायाः अनुभूतेः अनुभवात् एकं मानं यस्य. The Vedántins and chiefly the Sánkhyas recognise three means of arriving at a correct knowledge of things:—"प्रत्यक्षानुमानागमाः प्रमाणानि". *Pa'tanjaladarshana;* while the Naiyáyikas add one more *viz.* उपमान, "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" *Nya'yadarshana.* Different schools of philosophy have their own number of *prama'nas;* still, all of them recognise प्रत्यक्षप्रमाण as the most important one. Though the word अनुभूति is applicable to all the *Pramánas* here it stands according to the Vedántins only for परोक्षानुभूति, or according to the Naiyáyikas for the मानसप्रत्यक्ष of आत्मा. Mr. Telang adopts the reading स्वा०—साराय and says, it is "susceptible of a two-fold interpretation, meaning either (*a*) to him who is the sole essence of self-knowledge, or (*b*) to him whose sole (or perhaps, एक should be taken to mean principal here) essence is self-knowledge." He considers the former interpretation preferable, and observes that it "would refer to the doctrine of the unity of the Supreme and Individual soul, since what we know when we know ourselves truly is the Bramha". We have, however, taken स्वा०—मानाय in our text, because स्वानुभूति is the best means of arriving at the final goal *viz.* perfect realisation of the Divinity. Instead of viewing the Divinity as the *sole essence of self-perception,* it is preferable to say that it can be chiefly realised *by means of self-perception*" or in other words, the exact comprehension of the Divinity is the ultimate result

arrived at *by means of* self-perception. नमः=(*Indecli.*) Salutation. The words नमः, स्वस्ति &c. govern the dative by 'नमःस्वस्तिस्वाहास्वधालं-वषड्योगाच्च.' *Pani.* II. iii. 19. शान्तम्=Peaceful; शान्ति is one of the chief essences, as तेजस् also is, of the Divinity. तेजस्=Splendour, light.

Bhartrihari has identified his favourite Deity,—Sadáshiva, with Bramha in this Stanza according to the Vedántic philosophy which looks upon peace, light, intelligence, infinity, indestructibility &c. as the forming essences of the Supreme Being. The following extracts will illustrate the ideas of the Vedántic School on this subject—

यं भान्तं चिद्घनैकं क्षितिजलपवनादित्यचन्द्रादयो ये
भासा तस्यैव चानुप्रविरलगतयो भान्ति तस्मिन्वसन्ति ॥
विद्युत्पुञ्जोऽग्निसंघोऽप्युडुगणविततिर्भासयेत्किं परेशं
ज्योतिः शान्तं ह्यनन्तं कविमजममरं शाश्वतं जन्मशून्यम् ॥ १ ॥ *Veda'ntake.*

देशकालान्यवस्तूनां कल्पितत्वाच्च मायया ॥
न देशादिकृतोऽन्तोऽस्ति ब्रह्मानन्त्यं स्फुटं तथा ॥ १ ॥ *Panchdashi.*

In connexion with this idea may be compared Gregory Nyssen's description (which we extract from Mr. Telang's notes) of the Divine Nature quoted by Mr. Mansel in his 'Philosophy of the Conditioned'. "It is neither in place nor in time, but before these and above these in an unspeakable manner, contemplated itself by itself through faith alone, neither measured by ages, nor moving along with times". Cudworth's Intellectual System has the following description of Divinity–"A perfect conscious understanding Being existing for itself from eternity and the cause of all other things." Book I, chap iiii, Sec. 3.

Metre—अनुष्टुप्—

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ॥ द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ १ ॥

Trans.—Salutation to the peaceful light, whose form is only pure intelligence unlimited and unconditioned by space, time, &c., and the principal means of knowing which is self-perception.

2. This Sloka is supposed to have been the outcome of the feelings of disgust in the mind of Bhartrihari at the discovery of infidelity on the part of his wife. It is said a Brahman came by a fruit which conferred immortality on him who ate it. He gave it to Bhartrihari who handed it to his wife. She bestowed it on her paramour, who made a gift of it to a sweetheart of his, and Bhartrihari saw this fruit in the hands of the last. This legend has been current in almost all parts of India. In one of the Mss: marked V a stanza is found preceding the present one. It stands as under:—योगीन्द्रेण फलं प्रदत्तम्-

जरामृत्याय यस्मै पुनः राज्यै भर्तृहरेण दत्तमनया वंठाय कस्मै ददे॥ वंठेनादितहीनपुण्ययुवतौ विप्राय वारस्त्रिया विप्रेणाऽपि तदेव दैववशतो राज्ञे प्रदत्तं पुनः ॥ १ ॥ In this Stanza the construction of the first line is neither clear nor grammatically accurate; and we are inclined to think that the Stanza has been an interpolation by the scribe, and not to be Bhartrihari's own. There is also a disagreement about the return of the fruit in the legend and the stanza; but the fact remains all the same that some kind of impression with regard to domestic intrigue, the cause of Bhartrihari's disgust of the world, was popular even when the Ms. V was written. मयि—Words signifying love, attachment, respect, &c., govern the locative of the person or thing for whom these feelings are shown. अन्यसक्तः—अन्यस्यां सक्तः=अन्यसक्तः. According to the ordinary formation of compounds this ought to have become अन्यासक्तः; but by the Vartika 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः;' *i.e.* pronouns, though standing for feminine nouns, take the masculine form in compounds and other Vrittis. *Cf.* अनन्यभाजं पतिमाप्नुहीति *Kumar.* III. 63. कृते=(*Indecl.*) For the sake of. This is generally compounded with another word, as काव्यं यशसेऽर्थकृते. When not so compounded it governs the genitive; *cf.* अमीषां प्राणानां कृते. *Vairâgya.* 36. परिशुष्यति—Looking at the general context, we are inclined to the reading परिशुष्यति in preference to परितुष्यति. The latter is explained to mean "is delighted with all that I do". It is more natural for a woman in love to pine for her lover than to be merely delighted at his doings. काचित्—A certain (woman); चित्, चन्, अपि and sometimes स्वित् added to interrogative pronouns and adverbs give them the sense of indefinite pronouns, as "न कश्चिच्चण्डकोपानाम्." *Niti.* 57. कदाचिदपि पर्यटन्. *Niti.* 5. धिक्=(*Indecl.*) Fie: governs the accusative; *cf.* धिगिमां देहभृतामसारताम्. *Raghu.* च इमां—The two words च and इमां have not here been joined according to the rules of Sandhi, which is permissible under the ruling:—संहितैकपदे नित्या नित्याधातूपसर्गयोः॥ नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥ *Siddh. Kau.* Sandhi must invariably be done in all grammatical forms, between *Upasargas* and *Dhâtus*, as well as in compounds, but grammarians leave it to the option of an author to make a Sandhi or not in composition. Rhetoricians, however, look upon words not joined by the rules of Sandhi as a defect and call it विसन्धिदोष. *Metre*–वसन्ततिलका–उक्ता वसन्ततिलका तभजा जगौगः. The pause is after the 8th syllable.

Trans.—That woman about whom I constantly meditate has no affection for me; she, however, yearns after another who is attached to some one else; while a certain woman pines away for me. Fie on her, on him, on the God of Love, on that woman, and on myself.

3. अज्ञः=Ignorant, जानातीति ज्ञः; न ज्ञः अज्ञः. विशेषज्ञः—विशेषं जानातीति=वि०-ज्ञः. सुखम् and सुखतरम्=Easily and more easily, used as *adverbs*. ज्ञानलव० ज्ञानस्य लवः ज्ञा०-लवः, दुष्टं यथा स्यात्तथा विदग्धः दुर्विदग्धः; ज्ञानलवेन दुर्विदग्धः ज्ञा०-ग्धः, दुर्विदग्ध is explained as 'arrogant'. विदग्ध is *lit.* well-burnt, burnished, hence, refined with culture. Comm. V has कदाग्रहग्रस्त *i.e* filled with foolish obstinacy: it is paraphrased by some by the word दुश्चतुर=अर्धज्वलित=half-refined, imperfectly (*lit.* badly) clever or educated. A number of Mss. insert तं in the last line and read ब्रह्माऽपि तं नरं न रञ्जयति. It is also heard recited by Hardásas and others in the same way; but it is incorrect according to the rules of prosody. रंजयति=रञ्ज् (causal) means 'to colour, to impart one's hue to', hence 'to gratify,' 'to propitiate, to win over.' *Metre* आर्या—यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि ॥ अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या ॥ *Shrutabodha*. The last *charana* ought not, therefore, to consist of more than 15 *ma'tra's*. If the तं be inserted, the line comes to consist of 16 *ma'tra's*. As it stands in the text it contains only 14 *ma'tra's*, but the last syllable here can be taken to be long by the rule 'पादान्तगोऽपि वा', and thus the 15 *ma'tra's* made up.

Trans.—An ignorant man can be easily propitiated, a wise man can still more easily be propitiated: but even Bramhá cannot please him who is puffed up with a little knowledge.

4. प्रसह्य (*Indecli.*)=Forcibly. मकर०—दंष्ट्रांकुर=tip of the fang. मकरस्य वक्त्रं; तस्य दंष्ट्रा म०-दंष्ट्रा; तस्याः अंकुरः, तस्मात्-म०-दं०—ङ्कुरात्. Some Mss. read मकरवक्त्रदंष्ट्रान्तरात्=From within the cavity formed by the fangs in the mouth of a crocodile. प्रचल०-ऊर्मीणां मालाः, ऊ०-मालाः; प्रचलन्त्यश्च ताः ऊर्मिमालाश्च प्र०-मालाः. ताभिः आकुलः तम्—प्रच०-कुलम्. Com. V has प्रचलन्तः ये ऊर्मयः तेषां मालाभिः आकुलः. The student may note the two ways in which the compound has been dissolved. He may also note that the word ऊर्मी is both *masc*: as well as *fem*. प्रतिनि०-प्रतिनिविष्ट=Perverse, obstinate in holding contrary opinions. मूर्खश्चासौ जनश्च मू०—जनः; तस्य चित्तं, मू०—चित्तम्; प्रतिनिविष्टं च तत् मू०-चित्तं च प्र०-चित्तम्. Com. V1 has प्रतिनिविष्टोऽसौ मूर्खजनश्च तस्य चित्तम्. पुष्पवत्—पुष्पेण तुल्यम्=Like a flower. The affix वत् is joined to nouns in the sense of तेन तुल्यं 'equally with' when the equality refers to action 'तेन तुल्यं क्रिया चेद्वतिः' *Pani.* V. i. 15. *Metre*—पृथ्वी—जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः The pause is after the 8th syllable.

Trans.—One may forcibly recover a jewel from the tip of the fang of a crocodile; he may even swim across the sea (whose waters are) agitated by a series of waves in motion; he may as well wear an excited serpent on his head as if it were a flower; but he cannot win over the perverse mind of a fool.

5. सिकतासु—The word सिकता is always used in the plural. यत्नतः तस् is added to words belonging to the आदि class in the sense of the instrumental, ablative, locative &c. by the Vártika; आद्यादिभ्य उपसंख्यानम् *Siddh. Kau.*; for further explanation *vide* note on St: 10. पीडयन् =Pressing or squeezing together. मृगतृष्णिका—मृगाणां तृष्णा यस्या सा, मृ° तृष्णा; सैव मृगतृष्णिका—a mirage; a phenomenon noticeable in the sandy tracts of the tropical regions. शशविषाण-The horn of the hare; an imposibility वन्ध्यासुत, खपुष्प, मृगतृष्णाजल, and शशशृङ्ग are "expressions most in use to signify things which do not exist" *vide Vairagya.* Misc. St. 20. प्रतिनिविष्ट°—*vide* note on St. 4. सिकतासु तैलम् and मृगतृष्णिकासु सलिलम्—we have given the ordinary meaning of these phrases in the translation. These, however, can be looked upon as compound phrases, the सु going with तैल and सलिल meaning 'Excellent oil could be extracted *from* sand, and one troubled with thirst could drink first class water *from off* the mirage'. This interpretation, perhaps, heightens the force of the arguments and preserves the प्रक्रम in the verse. The compounds in this case are to be dissolved as सिकतानां सुतैलम् and मृगतृष्णिकायाः सुसलिलम्. *Metre*—पृथ्वी. *vide* St. 4.

Trans.—A man may get even oil from sand by strenuous pressure; when oppressed by thirst he may drink water from the mirage; he may perchance even come across the horn of a hare in [his] wanderings; but he can never win the obstinate mind of a fool.

6. व्याल—This word means both a wild elephant and a serpent; व्यालो दुष्टगजे सर्पे *Medini.* The former is preferable as it heightens the beauty of the Alanâkra. Besides, a serpent is hardly heard of being tied by any thing, while an elephant is always secured by chains. *Cf.* न भवति बिसतन्तुर्वारणं वारणानाम्. *Ntii* 17. For a similar idea शब्दशास्त्रमनधीत्य यः पुमान्वक्तुमिच्छति वचः सभान्तरे बद्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना ॥ १ ॥ बालमृ°—बालं च तत् मृणालं च बा°—मृणालं; तस्य तन्तवः, तैः—बा°—मृ°—तन्तुभिः. रोद्धुम्—The Sanskrit Infinitive is formed by the addition of तुम् to the root and is used when one action is being done for another: thus it shows motive or purpose of an action and corresponds to the English 'Infinitive of purpose.' तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम्. *Panini* III. iii. 10. It is also used with verbs meaning 'to be able, to be bold, to know, to be wearied, to strive, to get, to begin, to set about, to bear, to be pleased, to be,'* and also with the verbs meaning 'to wish' provided its agent be the same as that of the verb, although one action be not for another by शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् *Panini* III. iv. 65. and समानकर्तृकेषु तुमुन् *Panini* III.

* *Vide* Apte's Guide § 176 and note thereon.

iii. 10. समुज्जृम्भते—(1st Conj. Atm.) Strives; endeavours. छेत्तुम्--*vide* note on रोद्धुम्. वज्रमणीन्—वज्रमणिः=A Diamond. वज्रोऽस्त्री हीरके पवौ. *Amar.* शिरिष०—'शिरीषस्य कुसुमम्', The Shiri'sha flower; known to be the most delicate and softest of flowers, तस्य प्रान्तः=प्रकृष्टोअन्तः extreme edge; तेन-शि०-प्रान्तेन. संनह्यते-नह् with सम् is *Atma.* when used in the sense of 'preparing', 'being ready for'; as युद्धाय संनह्यते. *M. Bha'shya.* रचयितुम्—*vide* note on रोद्धुम्. नेतुं वाञ्छति *vide* note on रोद्धुम् *supra.* पथि—The root नी takes two objects. It is optional with the speaker to put the अकथित or indirect object in the accusative or in its natural कारक case, which latter is done here. सुधा०—Com. K dissolves the compound as सुधां स्यन्दन्ते तच्छीलैः सु०-स्यन्दिभिः=अमृतस्राविभिः mellifluous. The root स्यन्द् (स्यन्दु प्रस्रवणे) is generally intransitive as " नदी वहति स्यन्दत इत्यर्थः" *Siddh. Kau.* However, Dhátupátha is not clear on the point of प्रस्रवणे being transitive or intransitive: we find the root used in the transitive sense in Bhattikavya "स्नेहमिव स्रवन्तीः"; therefore, in the present instance we must take स्यन्द् to be either transitive, or it must be looked upon as अन्तर्भावितण्यर्थ *i. e.* containing the causal force, or the phrase may be analysed in altogether a different manner as सुधा इव स्यन्दः अस्ति एषां तैः—सु०—स्यन्दिभिः. सूक्तैः=By good words. *Alankara*—मालानिदर्शना— × × निदर्शना ॥ अभवन्वस्तुसम्बंध उपमापरिकल्पकः ॥ १ ॥ × × अनेकोपमानयोगान्मालारूपाऽप्येषा ज्ञेया. *K. Pra.* When a connection of impossible things implies a comparison it is called निदर्शना which becomes मालानिदर्शना " Garland of Illustrations" when the उपमानाs or 'things compared to' are numerous. In the present instance a connection is established between the उपमेय (thing to be compared) *viz* : सत्पथे खलनयनेच्छा and the उपमानाs (things to be compared to) *viz*: मृणालतन्तुभिः व्यालनिरोधनम्, शिरीषकुसुमप्रान्तेन वज्रमणिच्छेदनम्, and मधुबिन्दुना क्षाराम्बुधेः माधुर्यरचनम्. *Metre*—शार्दूलविक्रीडितम्. सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्. The pause is after the 12th syllable.

Trans.—He who wishes to lead the wicked into the path of the virtuous by sweet persuasive language is like one who endeavours to curb a maddened elephant by means of tender lotus filaments, like one who tries to cut the diamond with the edge of (a petal of) the Shirísha flower, or like one who hopes to sweeten the salt waters of the ocean by means of a drop of honey.

7. स्वायत्तम्—स्वस्य आयत्तम्=Within one's own control. एकान्त०—एकान्त=Excessive, certain. तीव्रैकान्तनितान्तानि *Amar.* गुण=Advantage, efficacy; एकान्ताः गुणाः यस्मिन् तत्—ए०—गुणम्. For the use of एकान्त in the sense of 'certain', *cf.* एकान्तविध्वंसिषु मद्विधानां पिण्डेषु *Raghu* II. 57. छादनम्–

छाद्यते अनेन इति छादनम्=Cover. The affix ल्युट् (अन्) is added to roots in the sense of भाव, करण, and अधिकरण. 'करणाधिकरणयोश्च' *Pànini* III. iii. 117. विशेषतः—*vide* note on यत्नतः St. 5. सर्वं०—सर्वं विदन्ति ते सर्वविदः= Knowing many subjects, well versed. विभूषणम्—*vide* note on छादन *supra.* अपण्डितानाम्—पण्डा=सदसद्विवेकवती बुद्धिः=intelligence, knowledge पण्डः षण्डे धियि स्त्री स्यात् *Medini.* पण्डा सञ्जाता एषां ते पण्डिताः, न पण्डिताः अपण्डिताः, तेषां अपण्डितानाम्. "तदस्य सञ्जातं तारकादिभ्य इतच्" *Pànini* V. ii. 36. *Metre*—इन्द्रवज्रा—स्यादिन्द्रवज्रा यदि तौ जगौगः Pause after the 5th syllable.

Trans.—The Creator has produced for ignorance, a cover which is within one's own control and which is certain in its efficacy. In the assembly of the well-versed, silence specially becomes the ornament of the ignorant.

8. किञ्चिज्ज्ञः—Knowing a little. Mr. Telang takes यदा किञ्चिज्ज्ञः equal to यदा अकिञ्चिज्ज्ञः to mark distinctly the contrast with the third line. There is hardly any necessity of doing so. The repetition of the किञ्चित् in that line by itself indicates a progress and therefore a continued addition to the stock of knowledge; *vide* note on किञ्चित् *infra.* We prefer किञ्चिज्ज्ञः for, there is a greater possibility of a man who knows only a little to be blinded by pride than for one who knows nothing. *Cf.* " A little learning is a dangerous thing." *Pope.* " उथळ पाण्याला खळाळी फार." and "ज्ञानलवदुर्विदग्धः" St. 3 *supra.* द्विप—द्वाभ्यां (मुखेन शुण्डया च) पिबतीति द्विपः. मद—The rut of an elephant; pride or arrogance. अवलिप्त—Proud. किञ्चि०. The repetition here of किञ्चित् shows continuous acquisition of knowledge. 'नित्यवीप्सयोः' *Pànini* VIII. i. 4 *i. e.* words are repeated when they are intended to show excessiveness, frequency, succession or continuity of actions or things. Some Commentators construe the last line as तदा मूर्खोऽस्मीति मम मनः अभवत्. This is far fetched. It has been taken by some as ज्वरे इव मे मदः व्यपगतः but this does not appear satisfactory; for we find the poet comparing मद to ज्वर in various places; *e. g.* क एष मदज्वरः *Vairàgya.* 23 and दर्पज्वरभरः St. 29 of the same. We would construe the line as तदा मूर्खोऽस्मीति (अवगत्या) ज्वर इव मे मदः व्यपगतः taking अवगत्या as 'understood' from the context. ज्वर इव मदः—Just as fever is not confined to any particular portion of the body but affects the whole of it, so also pride deranges the whole of the mental system. *Alankàra*—उपमा-उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः *i. e.* A comparison is one in which the beauty of similarity between the two objects of comparison sparkles out. In the first line there is पूर्णोपमा or complete comparison and in the last line there is लुप्तोपमा. *Metre*—

शिखरिणी—रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी. The pause is after the 6th syllable.

Trans.—When I knew but a little, I was blinded by pride as an elephant is blinded by rut from excitement, and my mind was puffed up with the idea that I knew everything. When, however, I gradually gained knowledge through the contact of the wise I found I was a fool; and the pride, which had possessed me like fever, left me.

9. कृमि०—कृमीणां कुलैः चितम्. कुल—Swarm, cluster; चितं—Filled. लाला० - क्लिन्न—Moistened; covered with saliva. विगन्धि—Grammatically it ought to be विगन्धम् (विरुद्धः गन्धः यस्य तत् *Bahu:*). This is one of those forms which, though often met with in classic literature, are not easily reconcilable by grammar. As such they form knotty points for grammarians. The word as it stands in the text cannot be a Bahuvrihi compound because, गन्धस्येदुत्पूतिसुसुरभिभ्यः *Pani.* V. iv 135; गन्ध at the end of a Bahuvrihi compound becomes गन्धि when preceded by the words उत्, पूति, सु, सुरभि, *e. g.* उद्गन्धिः &c. The prefix वि is not included in the words enumerated above nor does it come under the Su'tras "उपमानाच्च", "अल्पाख्यायां" &c. We must, therefore, look upon the word विगन्धि to be merely an adjective formed from the word विगन्ध by the addition of the possessive suffix इन्, and ought to analyse it as विरुद्धः गन्धः विगन्धः, सोऽस्यास्तीति विगन्धि. This, too, is not quite satisfactory, because wherever the required sense of a phrase can be secured by a Bahuvrihi there is no necessity of adding affixes showing possession, 'न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः.' Mallinátha accounts for तुल्यगन्धि in *Raghu.* IV. 47 by looking upon it as an इन्नन्तबहुव्रीहि. जुगुप्सितम्—(*past par.* from the root गुप्)—Disgusting, abominable. Generally सन् (स्) is added to a root to convey the sense of desire with regard to the root-meaning, and the root is reduplicated before it. A few roots however such as गुप्, तिज् &c., do not take the सन् in the above sense but in some special meaning of the root itself, their desiderative base being formed by adding another सन्; thus गुप् takes सन् in the sense of censure and forms its primitive base जुगुप्स्. निरुपमरसम्—निर्गता उपमा यस्मात् सः निरुपमः, निरुपमः रसः यस्मिन् कर्मणि यथा भवति तथा नि०—रसम्; taken separately as an adverbial clause to खादन् meaning 'eats with unparalleled relish,' it makes a better sense (and no less than eight Mss. have it) than निरुपमरसप्रीत्या-निरामिषम्—without flesh, devoid of flesh. परिग्रह—the thing possessed, a possession. फल्गुता—Worthlessness. *Alankara*—अर्थान्तरन्यास—सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ॥ यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥ *K. Pra.* When a general or a particular statement is strengthend by its

opposite, either under a resemblance or its opposite, that is (termed) 'corroboration'. In this verse the callousness of a dog is supported by the general proposition of a low creature gloating over its possession of even an insignificant thing. *Metre*—हरिणी—नसमरसलाग षड्वेदैर्हयैर्हरिणी मता. The pause is after the 6th and then after the 4th syllable.

Trans.—A dog, even if he sees the lord of the Heavens (Indra) standing by him, hesitates not to devour with unparalleled relish and delight a human bone though it be destitute of flesh, full of clusters of vermin, emitting a loathsome stench, be disgusting, and covered with saliva. Verily a mean man gives no thought to the worthlessness of what he has come by.

10. शार्वम् (*adj:*)—शर्वस्येदम्—of Shiva. "ईश्वरः शर्व ईशानः शंकरः" *Amar.* पशु०—पशुपतिः—पशूनां जीवानां पतिः=Lord of the animal-world. The word पशु according to the Pashupatas means a soul. पशुपतेः शिरसः इति प०—शिरस्तः It is an *inde.* When तस् is added to nouns it gives them the sense of the Ablative and the phrase becomes an adverbial one; but phrases thus formed cannot be used with the root रुह् to grow and हा to abandon. This तस् should not be confounded with the तस् in यत्नतः St. 5 *supra,* which is सार्वविभक्तिक. क्षितिधरम्—धरतीति धरः, क्षित्याः धरः क्षि०-धरः and not क्षितिं धरतीति. Some Mss. read the first line शिरः शार्वं स्वर्गात्पतति शिरसस्तत्क्षितिधरम्. Here तत्क्षितिधरम्= सचाऽसौ क्षितिधरश्च, तम् *i. e.* 'to that well known mountain.' The force of तत् is not quite apparent and it breaks the symmetry of construction. An endeavour has been made by Krishna Shastree to take तत् equal to तस्मात् to go with शिरसः meaning 'from that head' but we are not aware of the use of तत् in the sense of तस्मात् as a pronoun in the Ablative case going with a noun in that case.

Whenever a gradual progress is indicated step by step, it is usual to repeat the word shewing the previous stage, or use its equivalent at the commencement of the next one. *Cf.* दारिद्र्याद्ध्रियमेति ह्रीपरिगतः सत्वात्परिभ्रश्यते निःसत्वः परिभूयते परिभवान्निर्वेदमापद्यते । निर्विण्णः शुचमेति शोकनिहतो बुद्ध्या परित्यज्यते निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥ *Mri.* I. A similar arrangement is followed in this Stanza. The reading adopted in the text therefore makes a better sense. महीध्रात्—महीं धारयतीति महीध्रः; मही+धृ—the affix क added under the rule कप्रकरणे मूलविभुजादिभ्यः उपसंख्यानम्. अधो०-This line is to be construed 'इयं गंगा अधोधः स्तोकं पदमुपगता' *i. e.* this Ganges has come to an insignificant position by going down lower and lower. This reading clearly indicates the gradual descent of the Ganges step by step, and conveys a more

vivid idea. The words उपरि, अधि, and अधस् are repeated to convey the sense of gradual continuous progress 'उपर्यध्यधसः सामीप्ये' *Pànini* VIII. i. 7. The reading अधो गङ्गा सेयं &c. can be construed as सा इयं गङ्गा अधः स्तोकं पदं उपगता 'that same Ganges has come down to such a low position.' स्तोकम्=Insignificant, or little. अथवा=It is no wonder. शतमुखः "applies literally to the fall of the river and to that of the man who is lost to all sense of right and wrong. It applies in the sense of 'a variety of ways.'" *Telang*. A full account of the passage of गङ्गा from the Heavens to the sea is given in the Rámáyana I. 35-45 "How Bhagiratha got the Ganges to Shiva's head, thence to the Himalaya, thence to the nether world, and how her waters sanctified the off-spring of Sagara is well-known." *Alankàra*—अर्थान्तरन्यास. (*Vide* St. 9), and also पर्याय. पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः *Kuwal*. The general proposition about the fall of a विवेकभ्रष्ट is strengthened by the particular one *viz*. the descent of the Ganges, and hence there is अर्थान्तरन्यास. There is पर्याय because the Stanza contains a narration of the Ganges resorting to several places. *Metre*—शिखरिणी. *Vide* St. 8 *supra*.

Trans.—The Ganges falls from Heaven on the head of Shiva, from the head of Shiva to the mountain, from that lofty mountain to the earth, and from thence to the ocean. Thus falling lower and lower has this river come to an insignificant position: what wonder, in a variety of ways comes about the fall of those who are lost to all sense of right or wrong.

11. वारयितुम्—For the use of the Infinitive with the root शक् see note on रोद्धुम् St. 6. हुतभुक्–हुतं भुङ्क्ते इति Fire. सूर्यातपः–सूर्यः=सरति आकाशे यद्वा सुवति कर्मणि लोकं प्रेरयति see *Sid: Kau* on *Pani*. III. i. 114. नाग=न गच्छतीति अगः; न अगः नागः यद्वा नगे भवः। नागेषु इन्द्रः श्रेष्ठः or an *upamita comp.* नागोऽयमिन्द्रः इव. निशितांकुश=A sharp hook. भेषजसंग्रहैः=By taking medicines in the right way. मन्त्रप्रयोग is the 'actual application' of spells and charms. शास्त्रविहितम्=Laid down by the Shástrás. We do not see the propriety of the word शास्त्र here. *Metre*—शार्दूलविक्रीडित. See St. 6.

Trans.—Fire can be quenched by water, the heat of the sun can be warded off by an umbrella, a wild elephant can be controlled by a sharp hook, a bull or a donkey by a cudgel; illness (can be got over) by taking medicines in the proper way, and poison can be eradicated by the use of various charms. A remedy has been ordained by the Shástrás for everything, but there is no medicine for a fool.

